# श्रीरमणगीता
## śrīramaṇagītā

## प्रथमोऽध्यायः
## prathamo'dhyāyaḥ

## उपासनप्राधान्यनिरूपणम्
## upāsanaprādhānyanirūpaṇam

महर्षिं रमणं नत्वा कार्तिकेयं नराकृतिम् ।
मतं तस्य प्रसन्नेन ग्रन्थेनोपनिबध्यते ॥ १.१ ॥

maharṣiṁ ramaṇaṁ natvā kārtikeyaṁ narākṛtim |
mataṁ tasya prasannena granthenopanibadhyate || 1.1||

ईशपुत्रशके रामभूमिनन्दधरामिते ।
एकोनत्रिंशद्दिवसे द्वादशे मासि शीतले ॥ १.२ ॥

īśaputraśake rāmabhūminandadharāmite |
ekonatriṁśaddivase dvādaśe māsi śītale || 1.2||

उपविष्टेषु सर्वेषु शिष्येषु नियतात्मसु ।
भगवन्तमृषिं सोऽहमपृच्छं निर्णयाप्तये ॥ १.३ ॥

upaviṣṭeṣu sarveṣu śiṣyeṣu niyatātmasu |
bhagavantamṛṣiṁ so'hamapṛcchaṁ nirṇayāptaye || 1.3||

**प्रथमः प्रश्नः**

सत्यासत्यविवेकेन मुच्यते केवलेन किम् ।
उताहो बन्धहानाय विद्यते साधनान्तरम् ॥ १.४ ॥

**prathamaḥ praśnaḥ**

satyāsatyavivekena mucyate kevalena kim |
utāho bandhahānāya vidyate sādhanāntaram || 1.4||

**द्वितीयः प्रश्नः**

किमलं शास्त्रचर्चैव जिज्ञासूनां विमुक्तये ।
यथा गुरूपदेशं किमुपासनमपेक्षते ॥ १.५ ॥

**dvitīyaḥ praśnaḥ**

kimalaṁ śāstracarcaiva jijñāsūnāṁ vimuktaye |
yathā gurūpadeśaṁ kimupāsanamapekṣate || 1.5||

**तृतीयः प्रश्नः**

स्थितप्रज्ञः स्थितप्रज्ञमात्मानं किं समर्थयेत् ।
विदित्वा परिपूर्णत्वं ज्ञानस्योपरतेरुत ॥ १.६ ॥

**tṛtīyaḥ praśnaḥ**

sthitaprajñaḥ sthitaprajñamātmānaṁ kiṁ samarthayet |
viditvā paripūrṇatvaṁ jñānasyoparateruta || 1.6||

**चतुर्थः प्रश्नः**

ज्ञानिनं केन लिङ्गेन ज्ञातुं शक्ष्यन्ति कोविदाः ।

**caturthaḥ praśnaḥ**

jñāninaṁ kena liṅgena jñātuṁ śakṣyanti kovidāḥ |

**पञ्चमः प्रश्नः**

ज्ञानायैव समाधिः किं कामायाप्युत कल्पते ॥ १.७ ॥

**pañcamaḥ praśnaḥ**

jñānāyaiva samādhiḥ kiṁ kāmāyāpyuta kalpate || 1.7||

**षष्ठः प्रश्नः**

कामेन योगमभ्यस्य स्थितप्रज्ञो भवेद्यदि ।
सकामोऽमुष्य साफल्यमधिगच्छति वा न वा ॥ १.८ ॥

**ṣaṣṭhaḥ praśnaḥ**

kāmena yogamabhyasya sthitaprajño bhavedyadi |
sakāmo'muṣya sāphalyamadhigacchati vā na vā || 1.8||

एवं मम गुरुः प्रश्नानाकर्ण्य करुणानिधिः ।
अब्रवीत्संशयच्छेदी रमणो भगवानृषिः ॥ १.९ ॥

evaṁ mama guruḥ praśnānākarṇya karuṇānidhiḥ |
abravītsaṁśayacchedī ramaṇo bhagavānṛṣiḥ || 1.9||

## प्रथमप्रश्नस्योत्तरम्

मोचयेत्सकलान्बन्धानात्मनिष्ठैव केवलम् ।
सत्यासत्यविवेकं तु प्राहुर्वैराग्यसाधनम् ॥ १.१० ॥

**prathamapraśnasyottaram**

mocayetsakalānbandhānātmaniṣṭhaiva kevalam |
satyāsatyavivekaṁ tu prāhurvairāgyasādhanam || 1.10||

सदा तिष्ठति गम्भीरो ज्ञानी केवलमात्मनि ।
नासत्यं चिन्तयेद्विश्वं न वा स्वस्य तदन्यताम् ॥ १.११ ॥
sadā tiṣṭhati gambhīro jñānī kevalamātmani |
nāsatyaṁ cintayedviśvaṁ na vā svasya tadanyatām || 1.11||

## द्वितीयप्रश्नस्योत्तरम्

न संसिद्धिर्विजिज्ञासोः केवलं शास्त्रचर्चया ।
उपासनं विना सिद्धिर्नैव स्यादिति निर्णयः ॥ १.१२ ॥
**dvitīyapraśnasyottaram**
na saṁsiddhirvijijñāsoḥ kevalaṁ śāstracarcayā |
upāsanaṁ vinā siddhirnaiva syāditi nirṇayaḥ || 1.12||

अभ्यासकाले सहजांस्थितिं प्राहुरुपासनम् ।
सिद्धिं स्थिरां यदा गच्छेत्सैव ज्ञानं तदोच्यते ॥ १.१३ ॥
abhyāsakāle sahajāṁsthitiṁ prāhurupāsanam |
siddhiṁ sthirāṁ yadā gacchetsaiva jñānaṁ tadocyate || 1.13||

विषयाँत्सम्परित्यज्य स्वस्वभावेन संस्थितिः ।
ज्ञानज्वालाकृतिः प्रोक्ता सहजा स्थितिरात्मनः ॥ १.१४ ॥
viṣayām̐tsamparityajya svasvabhāvena saṁsthitiḥ |
jñānajvālākṛtiḥ proktā sahajā sthitirātmanaḥ || 1.14||

**तृतीयप्रश्नस्योत्तरम्**

निर्वासनेन मौनेन स्थिरायां सहजस्थितौ ।
ज्ञानी ज्ञानिनमात्मानं निस्सन्देहः समर्थयेत् ॥ १.१५ ॥

**tṛtīyapraśnasyottaram**

nirvāsanena maunena sthirāyāṁ sahajasthitau |
jñānī jñāninamātmānaṁ nissandehaḥ samarthayet || 1.15||

**चतुर्थप्रश्नस्योत्तरम्**

सर्वभूतसमत्वेन लिङ्गेन ज्ञानमूह्यताम् ।

**caturthapraśnasyottaram**

sarvabhūtasamatvena liṅgena jñānamūhyatām |

**पञ्चमप्रश्नस्योत्तरम्**

कामारब्धस्समाधिस्तु कामं फलति निश्चितम् ॥ १.१६ ॥

**pañcamapraśnasyottaram**

kāmārabdhassamādhistu kāmaṁ phalati niścitam || 1.16||

**षष्ठप्रश्नस्योत्तरम्**

कामेन योगमभ्यस्य स्थितप्रज्ञो भवेद्यदि ।
स कामोऽमुष्य साफल्यं गच्छन्नपि न हर्षयेत् ॥ १.१७ ॥

**ṣaṣṭhapraśnasyottaram**

kāmena yogamabhyasya sthitaprajño bhavedyadi |
sa kāmo'muṣya sāphalyaṁ gacchannapi na harṣayet || 1.17||

इति श्रीरमणगीतासु ब्रह्मविद्यायां योगशास्त्रे रमणान्तेवासिनो वासिष्ठस्य गणपतेरुपनिबन्धे उपासनप्राधान्यनिरूपणं नाम प्रथमोऽध्यायः

iti śrīramaṇagītāsu brahmavidyāyāṁ yogaśāstre
ramaṇāntevāsino vāsiṣṭhasya gaṇapaterupanibandhe
upāsanaprādhānyanirūpaṇaṁ nāma prathamo'dhyāyaḥ

# द्वितीयोऽध्यायः
# dvitīyo'dhyāyaḥ

## मार्गत्रयकथनम्
## mārgatrayakathanam

ईशपुत्रशके बाणभूमिनन्दधरामिते ।
चातुर्मास्ये जगौ सारं सङ्गृह्य भगवानृषिः ॥ २.१ ॥
īśaputraśake bāṇabhūminandadharāmite ।
cāturmāsye jagau sāraṁ saṅgṛhya bhagavānṛṣiḥ ।। 2.1।।

हृदयकुहरमध्ये केवलं ब्रह्ममात्रं
ह्यहमहमिति साक्षादात्मरूपेण भाति ।
हृदि विश मनसा स्वं चिन्वता मज्जता वा
पवनचलनरोधादात्मनिष्ठो भव त्वम् ॥ २.२ ॥
hṛdayakuharamadhye kevalaṁ brahmamātraṁ
hyahamahamiti sākṣādātmarūpeṇa bhāti ।
hṛdi viśa manasā svaṁ cinvatā majjatā vā
pavanacalanarodhādātmaniṣṭho bhava tvam ।। 2.2।।

श्लोकं भगवतो वक्त्रान्महर्षेरिममुद्गतम् ।
श्रुत्यन्तसारं यो वेद संशयो नास्य जातुचित् ॥ २.३ ॥
ślokaṁ bhagavato vaktrānmaharṣerimamudgatam ।
śrutyantasāraṁ yo veda saṁśayo nāsya jātucit ।। 2.3।।

अत्र श्लोके भगवता पूर्वार्धे स्थानमीरितम् ।
शारीरकस्य दृश्येऽस्मिँच्छरीरे पाञ्चभौतिके ॥ २.४ ॥
atra śloke bhagavatā pūrvārdhe sthānamīritam |
śārīrakasya dṛśye'smiṁccharīre pāñcabhautike || 2.4||

तत्रैव लक्षणं चोक्तं द्वैतमीशा च वारितम् ।
उक्तं चाप्यपरोक्षत्वं नानालिङ्गनिबर्हणम् ॥ २.५ ॥
tatraiva lakṣaṇaṁ coktaṁ dvaitamīśā ca vāritam |
uktaṁ cāpyaparokṣatvaṁ nānāliṅganibarhaṇam || 2.5||

उपदेशो द्वितीयार्धे शिष्याभ्यासकृते कृतः ।
त्रेधाभिन्नेन मार्गेण तत्त्वादैक्यं समीयुषा ॥ २.६ ॥
upadeśo dvitīyārdhe śiṣyābhyāsakṛte kṛtaḥ |
tredhābhinnena mārgeṇa tattvādaikyaṁ samīyuṣā || 2.6||

उपायो मार्गणाभिख्यः प्रथमः सम्प्रकीर्तितः ।
द्वितीयो मज्जनाभिख्यः प्राणरोधस्तृतीयकः ॥ २.७ ॥
upāyo mārgaṇābhikhyaḥ prathamaḥ samprakīrtitaḥ |
dvitīyo majjanābhikhyaḥ prāṇarodhastṛtīyakaḥ || 2.7||

इति श्रीरमणगीतासु ब्रह्मविद्यायां योगशास्त्रे रमणान्तेवासिनो वासिष्ठस्य
गणपतेरुपनिबन्धे उपासनप्राधान्यनिरूपणं नाम द्वितीयोऽध्यायः
iti śrīramaṇagītāsu brahmavidyāyāṁ yogaśāstre
ramaṇāntevāsino vāsiṣṭhasya gaṇapaterupanibandhe
upāsanaprādhānyanirūpaṇaṁ nāma dvitīyo'adhyāyaḥ

# तृतीयोऽध्यायः
# tṛtīyo'dhyāyaḥ

## मुख्यकर्तव्यनिरूपणम्
## mukhyakartavyanirūpaṇam

दैवरातस्य संवादमाचार्यरमणस्य च ।
निबध्नीमस्तृतीयेऽस्मिन्नध्याये विदुषां मुदे ॥ ३.१ ॥
daivarātasya saṁvādamācāryaramaṇasya ca |
nibadhnīmastṛtīye'sminnadhyāye viduṣāṁ mude || 3.1||

**दैवरात उवाच**
किं कर्तव्यं मनुष्यस्य प्रधानमिह संसृतौ ।
एकं निर्धार्य भगवाँस्तन्मे व्याख्यातुमर्हति ॥ ३.२ ॥
**daivarāta uvāca**
kiṁ kartavyaṁ manuṣyasya pradhānamiha saṁsṛtau |
ekaṁ nirdhārya bhagavāṁstanme vyākhyātumarhati || 3.2||

**भगवानुवाच**
स्वस्य स्वरूपं विज्ञेयं प्रधानं महदिच्छता ।
प्रतिष्ठा यत्र सर्वेषां फलानामुत कर्मणाम् ॥ ३.३ ॥
**bhagavānuvāca**
svasya svarūpaṁ vijñeyaṁ pradhānaṁ mahadicchatā |
pratiṣṭhā yatra sarveṣāṁ phalānāmuta karmaṇām || 3.3||

**दैवरात उवाच**

स्वस्य स्वरूपविज्ञाने साधनं किं समासतः ।
सिध्येत्केन प्रयत्नेन प्रत्यग्दृष्टिर्महीयसी ॥ ३.४ ॥

**daivarāta uvāca**
svasya svarūpavijñāne sādhanaṁ kiṁ samāsataḥ |
sidhyetkena prayatnena pratyagdṛṣṭirmahīyasī || 3.4||

**भगवानुवाच**

विषयेभ्यः परावृत्य वृत्तीः सर्वाः प्रयत्नतः ।
विमर्शे केवलं तिष्ठेदचले निरुपाधिके ॥ ३.५ ॥

**bhagavānuvāca**
viṣayebhyaḥ parāvṛtya vṛttīḥ sarvāḥ prayatnataḥ |
vimarśe kevalaṁ tiṣṭhedacale nirupādhike || 3.5||

स्वस्य स्वरूपविज्ञाने साधनं तत्समासतः ।
सिध्येत्तेनैव यत्नेन प्रत्यग्दृष्टिर्महीयसी ॥ ३.६ ॥

svasya svarūpavijñāne sādhanaṁ tatsamāsataḥ |
sidhyettenaiva yatnena pratyagdṛṣṭirmahīyasī || 3.6||

**दैवरात उवाच**

यावत्सिद्धिर्भवेन्नृणां योगस्य मुनिकुञ्जर ।
तावन्तं नियमाः कालं किं यत्नमुपकुर्वते ॥ ३.७ ॥

**daivarāta uvāca**
yāvatsiddhirbhavennṝṇāṁ yogasya munikuñjara |
tāvantaṁ niyamāḥ kālaṁ kiṁ yatnamupakurvate || 3.7||

**भगवानुवाच**

प्रयत्नमुपकुर्वन्ति नियमा युञ्जतां सताम् ।
सिद्धानां कृतकृत्यानं गलन्ति नियमास्स्वयम् ॥ ३.८ ॥

**bhagavānuvāca**
prayatnamupakurvanti niyamā yuñjatāṁ satām |
siddhānāṁ kṛtakṛtyānaṁ galanti niyamāssvayam || 3.8||

**दैवरात उवाच**

केवलेन विमर्शेन स्थिरेण निरुपाधिना ।
यथा सिद्धिस्तथा मन्त्रैर्जप्तैः सिद्धिर्भवेन्न वा ॥ ३.९ ॥

**daivarāta uvāca**
kevalena vimarśena sthireṇa nirupādhinā |
yathā siddhistathā mantrairjaptaiḥ siddhirbhavenna vā || 3.9||

**भगवानुवाच**

अचञ्चलेन मनसा मन्त्रैर्जप्तैर्निरन्तरम् ।
सिद्धिः स्याच्छ्रद्धधानानां जप्तेन प्रणवेन वा ॥ ३.१० ॥

**bhagavānuvāca**
acañcalena manasā mantrairjaptairnirantaram |
siddhiḥ syācchraddhadhānānāṁ japtena praṇavena vā || 3.10||

वृत्तिर्जपेन मन्त्राणां शुद्धस्य प्रणवस्य वा ।
विषयेभ्यः परावृत्ता स्वस्वरूपात्मिका भवेत् ॥ ३.११ ॥

vṛttirjapena mantrāṇāṁ śuddhasya praṇavasya vā |
viṣayebhyaḥ parāvṛttā svasvarūpātmikā bhavet || 3.11||

ईशपुत्रशके शैल भूमिनन्दधरामिते ।
सप्तमे सप्तमे सोऽयं संवादोऽभवदद्भुतः ॥ ३.१२ ॥
īśaputraśake śaila bhūminandadharāmite |
saptame saptame so'yaṁ saṁvādo'bhavadadbhutaḥ || 3.12||

इति श्रीरमणगीतासु ब्रह्मविद्यायां योगशास्त्रे रमणान्तेवासिनो
वासिष्ठस्य गणपतेरुपनिबन्धे मुख्यकर्तव्यनिरूपणं नाम तृतीयोऽध्यायः
iti śrīramaṇagītāsu brahmavidyāyāṁ yogaśāstre
ramaṇāntevāsino
vāsiṣṭhasya gaṇapaterupanibandhe mukhyakartavyanirūpaṇaṁ
nāma tṛtīyo'dhyāyaḥ

# चतुर्थऽध्यायः
# caturtha'dhyāyaḥ

## ज्ञानस्वरूपकथनम्
## jñānasvarūpakathanam

**प्रथमः प्रश्नः**

अहं ब्रह्मास्मीति वृत्तिः किं ज्ञानं मुनिकुञ्जर ।
उत ब्रह्माहमिति धीर्धीरहं सर्वमित्युत ॥ ४.१ ॥

**prathamaḥ praśnaḥ**

ahaṁ brahmāsmīti vṛttiḥ kiṁ jñānaṁ munikuñjara ।
uta brahmāhamiti dhīrdhīrahaṁ sarvamityuta ।। 4.1।।

अथवा सकलं चैतद्ब्रह्मेति ज्ञानमुच्यते ।
अस्माद्वृत्तिचतुष्काद्वा किं नु ज्ञानं विलक्षणम् ॥ ४.२ ॥

athavā sakalaṁ caitahbrahmeti jñānamucyate ।
asmādvṛtticatuṣkādvā kiṁ nu jñānaṁ vilakṣaṇam ।। 4.2।।

**अस्योत्तरम्**

इमं मम गुरुः प्रश्नमन्तेवासिन आदरात् ।
आकर्ण्य रमणो वाक्यमुवाच भगवान्मुनिः ॥ ४.३ ॥

**asyottaram**

imaṁ mama guruḥ praśnamantevāsina ādarāt ।
ākarṇya ramaṇo vākyamuvāca bhagavānmuniḥ ।। 4.3।।

वृत्तयो भावना एव सर्वा एता न संशयः ।
स्वरूपावस्थितिं शुद्धां ज्ञानमाहुर्मनीषिणः ॥ ४.४ ॥
vṛttayo bhāvanā eva sarvā etā na saṁśayaḥ |
svarūpāvasthitiṁ śuddhāṁ jñānamāhurmanīṣiṇaḥ || 4.4||

गुरोर्वचस्तदाकर्ण्य संशयच्छेदकारकम् ।
अपृच्छं पुनरेवाहमन्यं संशयमुद्गतम् ॥ ४.५ ॥
gurorvacastadākarṇya saṁśayacchedakārakam |
apṛcchaṁ punarevāhamanyaṁ saṁśayamudgatam || 4.5||

**द्वितीयः प्रश्नः**

वृत्तिव्याप्यं भवेद्ब्रह्म न वा नाथ तपस्विनाम् ।
इमं मे हृदि सञ्जातं संशयं छेत्तुमर्हसि ॥ ४.६ ॥

**dvitīyaḥ praśnaḥ**

vṛttivyāpyaṁ bhavedbrahma na vā nātha tapasvinām |
imaṁ me hṛdi sañjātaṁ saṁśayaṁ chettumarhasi || 4.6||

तमिमं प्रश्नमाकर्ण्य मित्रमङ्घ्रिजुषामृषिः ।
अभिषिच्य कटाक्षेण मामिदं वाक्यमब्रवीत् ॥ ४.७ ॥
tamimaṁ praśnamākarṇya mitramaṅghrijuṣāmṛṣiḥ |
abhiṣicya kaṭākṣeṇa māmidaṁ vākyamabravīt || 4.7||

**अस्योत्तरम्**

स्वात्मभूतं यदि ब्रह्म ज्ञातुं वृत्तिः प्रवर्तते ।
स्वात्माकारा तदा भूत्वा न पृथक् प्रतितिष्ठति ॥ ४.८ ॥

**asyottaram**
svātmabhūtaṁ yadi brahma jñātuṁ vṛttiḥ pravartate |
svātmākārā tadā bhūtvā na pṛthak pratitiṣṭhati || 4.8||

अयं प्रागुक्त एवाब्दे सप्तमे त्वेकविंशके ।
अभवन्नौ मितग्रन्थः संवादो रोमहर्षणः ॥ ४.९ ॥

ayaṁ prāgukta evābde saptame tvekaviṁśake |
abhavannau mitagranthaḥ saṁvādo romaharṣaṇaḥ || 4.9||

इति श्रीरमणगीतासु ब्रह्मविद्यायां योगशास्त्रे रमणान्तेवासिनो
वासिष्ठस्य गणपतेरुपनिबन्धे ज्ञानस्वरूपकथनं नाम चतुर्थोऽध्यायः

iti śrīramaṇagītāsu brahmavidyāyāṁ yogaśāstre
ramaṇāntevāsino
vāsiṣṭhasya gaṇapaterupanibandhe jñānasvarūpakathanaṁ
nāma caturtho'dhyāyaḥ

# पञ्चमोऽध्यायः
## pañcamo'dhyāyaḥ

# हृदयविद्या
## hṛdayavidyā

प्रागुक्तेऽब्देऽष्टमे मासि नवमे दिवसे निशि ।
उपन्यसितवाँत्सम्यगुद्दिश्य हृदयं मुनिः ॥ ५.१ ॥
prāgukte'bde'ṣṭame māsi navame divase niśi |
upanyasitavām̐tsamyaguddiśya hṛdayaṁ muniḥ || 5.1||

निर्गच्छन्ति यतः सर्वा वृत्तयो देहधारिणाम् ।
हृदयं तत्समाख्यातं भावनाऽऽकृतिवर्णनम् ॥ ५.२ ॥
nirgacchanti yataḥ sarvā vṛttayo dehadhāriṇām |
hṛdayaṁ tatsamākhyātaṁ bhāvanā''kṛtivarṇanam || 5.2||

अहंवृत्तिः समस्तानां वृत्तीनां मूलमुच्यते ।
निर्गच्छति यतोऽहंधीर्हृदयं तत्समासतः ॥ ५.३ ॥
ahaṁvṛttiḥ samastānāṁ vṛttīnāṁ mūlamucyate |
nirgacchati yato'handhīrhṛdayaṁ tatsamāsataḥ || 5.3||

हृदयस्य यदि स्थानं भवेच्चक्रमनाहतम् ।
मूलाधारं समारभ्य योगस्योपक्रमः कुतः ॥ ५.४ ॥
hṛdayasya yadi sthānaṁ bhaveccakramanāhatam |
mūlādhāraṁ samārabhya yogasyopakramaḥ kutaḥ || 5.4||

अन्यदेव ततो रक्तपिण्डाद्धृदयमुच्यते ।
अयं हृदिति वृत्त्या तदात्मनो रूपमीरितम् ॥ ५.५ ॥
anyadeva tato raktapiṇḍāddhṛdayamucyate |
ayaṁ hṛditi vṛttyā tadātmano rūpamīritam || 5.5||

तस्य दक्षिणतो धाम हृत्पीठे नैव वामतः ।
तस्मात्प्रवहति ज्योतिः सहस्त्रारं सुषुम्नया ॥ ५.६ ॥
tasya dakṣiṇato dhāma hṛtpīṭhe naiva vāmataḥ |
tasmātpravahati jyotiḥ sahastrāraṁ suṣumnayā || 5.6||

सर्वं देहं सहस्त्रारात्तदा लोकानुभूतयः ।
ताः प्रपश्यन्विभेदेन संसारी मनुजो भवेत् ॥ ५.७ ॥
sarvaṁ dehaṁ sahastrārāttadā lokānubhūtayaḥ |
tāḥ prapaśyanvibhedena saṁsārī manujo bhavet || 5.7||

आत्मस्थस्य सहस्त्रारं शुद्धं ज्योतिर्मयं भवेत्।
तत्र जीवेन्न सङ्कल्पो यदि सान्निध्यतः पतेत्॥ ५.८॥

ātmasthasya sahastrāraṁ śuddhaṁ jyotirmayaṁ bhavet |
tatra jīvenna saṅkalpo yadi sānnidhyataḥ patet || 5.8||

विज्ञायमानविषयं सन्निकर्षेण यद्यपि।
न भवेद्योगभङ्गाय भेदस्याग्रहणे मनः॥ ५.९॥

vijñāyamānaviṣayaṁ sannikarṣeṇa yadyapi |
na bhavedyogabhaṅgāya bhedasyāgrahaṇe manaḥ || 5.9||

गृह्णतोऽपि स्थिरैकाधीः सहजा स्थितिरुच्यते।
निर्विकल्पः समाधिस्तु विषयासन्निधौ भवेत्॥ ५.१०॥

gṛhṇato'pi sthiraikādhīḥ sahajā sthitirucyate |
nirvikalpaḥ samādhistu viṣayāsannidhau bhavet || 5.10||

अण्डं वपुषि निःशेषं निःशेषं हृदये वपुः।
तस्मादण्डस्य सर्वस्य हृदयं रूपसम्ग्रहः॥ ५.११॥

aṇḍaṁ vapuṣi niḥśeṣaṁ niḥśeṣaṁ hṛdaye vapuḥ |
tasmādaṇḍasya sarvasya hṛdayaṁ rūpasamgrahaḥ || 5.11||

भुवनं मनसो नान्यदन्यन्न हृदयान्मनः।
अशेषा हृदये तस्मात्कथा परिसमाप्यते॥ ५.१२॥

bhuvanaṁ manaso nānyadanyanna hṛdayānmanaḥ |
aśeṣā hṛdaye tasmātkathā parisamāpyate || 5.12||

कीर्त्यते हृदयं पिण्डे यथाण्डे भानुमण्डलम्।
मनः सहस्त्रारगतं बिम्बं चान्द्रमसं यथा॥ ५.१३॥

kīrtyate hṛdayaṁ piṇḍe yathāṇḍe bhānumaṇḍalam |
manaḥ sahastrāragataṁ bimbaṁ cāndramasaṁ yathā || 5.13||

यथा ददाति तपनस्तेजः कैरवबन्धवे ।
इदं वितरति ज्योतिर्हृदयं मनसे तथा ॥ ५.१४ ॥
yathā dadāti tapanastejaḥ kairavabandhave |
idaṁ vitarati jyotirhṛdayaṁ manase tathā || 5.14||

हृद्यसन्निहितो मर्त्यो मनः केवलमीक्षते ।
असन्निकर्षे सूर्यस्य रात्रौ चन्द्रे यथा महः ॥ ५.१५ ॥
hṛdyasannihito martyo manaḥ kevalamīkṣate |
asannikarṣe sūryasya rātrau candre yathā mahaḥ || 5.15||

अपश्यंस्तेजसो मूलं स्वरूपं सत्यमात्मनः ।
मनसा च पृथक्पश्यन्भावान्भ्राम्यति पामरः ॥ ५.१६ ॥
apaśyaṁstejaso mūlaṁ svarūpaṁ satyamātmanaḥ |
manasā ca pṛthakpaśyanbhāvānbhrāmyati pāmaraḥ || 5.16||

हृदि सन्निहितो ज्ञानी लीनं हृदयतेजसि ।
ईक्षते मानसं तेजो दिवाभानाविवैन्दवम् ॥ ५.१७ ॥
hṛdi sannihito jñānī līnaṁ hṛdayatejasi |
īkṣate mānasaṁ tejo divābhānāvivaindavam || 5.17||

प्रज्ञानस्य प्रवेत्तारो वाच्यमर्थं मनो विदुः ।
अर्थं तु लक्ष्यं हृदयं हृदयान्नापरः परः ॥ ५.१८ ॥
prajñānasya pravettāro vācyamarthaṁ mano viduḥ |
arthaṁ tu lakṣyaṁ hṛdayaṁ hṛdayānnāparaḥ paraḥ || 5.18||

दृग्दृश्यभेदधीरेषा मनसि प्रतितिष्ठति ।
हृदये वर्तमानानां दृग्दृश्यंचैकतां व्रजेत् ॥ ५.१९ ॥
dṛgdṛśyabhedadhīreṣā manasi pratitiṣṭhati |
hṛdaye vartamānānāṁ dṛgdṛśyañcaikatāṁ vrajet || 5.19||

मूर्च्छा निद्रातिसन्तोष शोकावेशभयादिभिः ।
निमित्तैराहता वृत्तिः स्वस्थानं हृदयं व्रजेत् ॥ ५.२० ॥
mūrcchā nidrātisantoṣa śokāveśabhayādibhiḥ |
nimittairāhatā vṛttiḥ svasthānaṁ hṛdayaṁ vrajet || 5.20||

तदा न ज्ञायते प्राप्तिर्हृदयस्य शरीरिणा ।
विज्ञायते समाधौ तु नामभेदो निमित्ततः ॥ ५.२१ ॥
tadā na jñāyate prāptirhṛdayasya śarīriṇā |
vijñāyate samādhau tu nāmabhedo nimittataḥ || 5.21||

इति श्रीरमणगीतासु ब्रह्मविद्यायां योगशास्त्रे रमणान्तेवासिनो
वासिष्ठस्य गणपतेरुपनिबन्धे हृदयविद्या नाम पञ्चमोऽध्यायः
iti śrīramaṇagītāsu brahmavidyāyāṁ yogaśāstre ramaṇāntevāsino
vāsiṣṭhasya gaṇapaterupanibandhe hṛdayavidyā nāma
pañcamo'dhyāyaḥ

# षष्ठोऽध्यायः
**ṣaṣṭho'dhyāyaḥ**

# मनोनिग्रहोपायः
**manonigrahopāyaḥ**

निरूप्य हृदयस्यैवं तत्त्वं तत्त्वविदांवरः।
मनसो निग्रहोपायमवदद्रमणो मुनिः॥ ६.१॥
nirūpya hṛdayasyaivaṁ tattvaṁ tattvavidāṁvaraḥ |
manaso nigrahopāyamavadadramaṇo muniḥ || 6.1||

नित्यवृत्तिमतां नृणां विषयासक्तचेतसाम्।
वासनानां बलीयस्त्वान्मनो दुर्निग्रहं भवेत्॥ ६.२॥
nityavṛttimatāṁ nṝṇāṁ viṣayāsaktacetasām |
vāsanānāṁ balīyastvānmano durnigrahaṁ bhavet || 6.2||

चपलं तन्निगृह्णीयात्प्राणरोधेन मानवः।
पाशबद्धो यथा जन्तुस्तथा चेतो न चेष्टते॥ ६.३॥
capalaṁ tannigṛhṇīyātprāṇarodhena mānavaḥ |
pāśabaddho yathā jantustathā ceto na ceṣṭate || 6.3||

प्राणरोधेन वृत्तीनां निरोधः साधितो भवेत्।
वृत्तिरोधेन वृत्तीनां जन्मस्थाने स्थितो भवेत्॥ ६.४॥
prāṇarodhena vṛttīnāṁ nirodhaḥ sādhito bhavet ।
vṛttirodhena vṛttīnāṁ janmasthāne sthito bhavet ।। 6.4।।

प्राणरोधश्च मनसा प्राणस्य प्रत्यवेक्षणम्।
कुम्भकं सिध्यति ह्येवं सततप्रत्यवेक्षणात्॥ ६.५॥
prāṇarodhaśca manasā prāṇasya pratyavekṣaṇam ।
kumbhakaṁ sidhyati hyevaṁ satatapratyavekṣaṇāt ।। 6.5।।

येषां नैतेन विधिना शक्तिः कुम्भकसाधने।
हठयोगविधानेन तेषां कुम्भकमिष्यते॥ ६.६॥
yeṣāṁ naitena vidhinā śaktiḥ kumbhakasādhane ।
haṭhayogavidhānena teṣāṁ kumbhakamiṣyate ।। 6.6।।

एकदा रेचकं कुर्यात्कुर्यात्पूरकमेकदा।
कुम्भकं तु चतुर्वारं नाडीशुद्धिर्भवेत्ततः॥ ६.७॥
ekadā recakaṁ kuryātkuryātpūrakamekadā ।
kumbhakaṁ tu caturvāraṁ nāḍīśuddhirbhavettataḥ ।। 6.7।।

प्राणो नाडीषु शुद्धासु निरुद्धः क्रमशो भवेत् ।
प्राणस्य सर्वधारोधः शुद्धं कुम्भकमुच्यते ॥ ६.८ ॥
prāṇo nāḍīṣu śuddhāsu niruddhaḥ kramaśo bhavet |
prāṇasya sarvadhārodhaḥ śuddhaṁ kumbhakamucyate || 6.8||

त्यागं देहात्मभावस्य रेचकं ज्ञानिनः परे ।
पूरकं मार्गणं स्वस्य कुम्भकं सहजस्थितिम् ॥ ६.९ ॥
tyāgaṁ dehātmabhāvasya recakaṁ jñāninaḥ pare |
pūrakaṁ mārgaṇaṁ svasya kumbhakaṁ sahajasthitim || 6.9||

जपेन वाऽथ मन्त्राणां मनसो निग्रहो भवेत् ।
मानसेन तदा मन्त्रप्राणयोरेकता भवेत् ॥ ६.१० ॥
japena vā'tha mantrāṇāṁ manaso nigraho bhavet |
mānasena tadā mantraprāṇayorekatā bhavet || 6.10||

मन्त्राक्षराणां प्राणेन सायुज्यं ध्यानमुच्यते ।
सहजस्थितये ध्यानं दृढभूमि प्रकल्पते ॥ ६.११ ॥
mantrākṣarāṇāṁ prāṇena sāyujyaṁ dhyānamucyate |
sahajasthitaye dhyānaṁ dṛḍhabhūmi prakalpate || 6.11||

सहवासेन महतां सतामारूढचेतसाम्।
क्रियमाणेन वा नित्यं स्थाने लीनं मनो भवेत्॥ ६.१२ ॥
sahavāsena mahatāṁ satāmārūḍhacetasām |
kriyamāṇena vā nityaṁ sthāne līnaṁ mano bhavet || 6.12||

इति श्रीरमणगीतासु ब्रह्मविद्यायां योगशास्त्रे रमणान्तेवासिनो
वासिष्ठस्य गणपतेरुपनिबन्धे मनोनिग्रहोपायो नाम षष्ठोऽध्यायः
iti śrīramaṇagītāsu brahmavidyāyāṁ yogaśāstre ramaṇāntevāsino
vāsiṣṭhasya gaṇapaterupanibandhe manonigrahopāyo nāma
ṣaṣṭho'dhyāyaḥ

# सप्तमोऽध्यायः
**saptamo'dhyāyaḥ**

# आत्मविचाराधिकारितदङ्गनिरूपणम्
**ātmavicārādhikāritadaṅganirūpaṇam**

भारद्वाजस्य वै कार्ष्णेराचार्यरमणस्य च ।
अध्याये कथ्यते श्रेष्ठः संवाद इह सप्तमे ॥ ७.१ ॥

bhāradvājasya vai kārṣṇerācāryaramaṇasya ca |
adhyāye kathyate śreṣṭhaḥ saṁvāda iha saptame || 7.1||

**कार्ष्णिरुवाच**

रूपमात्मविचारस्य किं नु किं वा प्रयोजनम् ।
लभ्यादात्मविचारेण फलं भूयोऽन्यतोऽस्ति वा ॥ ७.२ ॥

**kārṣṇiruvāca**
rūpamātmavicārasya kiṁ nu kiṁ vā prayojanam |
labhyādātmavicāreṇa phalaṁ bhūyo'nyato'sti vā || 7.2||

**भगवानुवाच**

सर्वासामपि वृत्तीनां समष्टिर्या समीरिता ।
अहंवृत्तेरमुष्यास्तु जन्मस्थानं विमृश्यताम् ॥ ७.३ ॥

**bhagavānuvāca**
sarvāsāmapi vṛttīnāṁ samaṣṭiryā samīritā |
ahaṁvṛtteramuṣyāstu janmasthānaṁ vimṛśyatām || 7.3||

एष आत्मविचारः स्यान्न शास्त्रपरिशीलनम् ।
अहङ्कारो विलीनः स्यान्मूलस्थानगवेषणे ॥ ७.४ ॥
eṣa ātmavicāraḥ syānna śāstrapariśīlanam |
ahaṅkāro vilīnaḥ syānmūlasthānagaveṣaṇe || 7.4||

आत्माभासस्त्वहङ्कारः स यदा सम्प्रलीयते ।
आत्मा सत्योऽभितः पूर्णः केवलः परिशिष्यते ॥ ७.५ ॥
ātmābhāsastvahaṅkāraḥ sa yadā sampralīyate |
ātmā satyo'bhitaḥ pūrṇaḥ kevalaḥ pariśiṣyate || 7.5||

सर्वक्लेशनिवृत्तिः स्यात्फलमात्मविचारतः ।
फलानामवधिः सोयमस्ति नेतोऽधिकं फलम् ॥ ७.६ ॥
sarvakleśanivṛttiḥ syātphalamātmavicārataḥ |
phalānāmavadhiḥ soyamasti neto'dhikaṁ phalam || 7.6||

अद्भुताः सिद्धयः साध्या उपायान्तरतश्च याः ।
ताः प्राप्तोऽपि भवत्यन्ते विचारेणैव निर्वृतः ॥ ७.७ ॥
adbhutāḥ siddhayaḥ sādhyā upāyāntarataśca yāḥ |
tāḥ prāpto'pi bhavatyante vicāreṇaiva nirvṛtaḥ || 7.7||

**कार्ष्णिरुवाच**

एतस्यात्मविचारस्य प्राहुः कमधिकारिणम् ।
अधिकारस्य सम्पत्तिः किं ज्ञातुं शक्यते स्वयम् ॥ ७.८ ॥

**kārṣṇiruvāca**

etasyātmavicārasya prāhuḥ kamadhikāriṇam |
adhikārasya sampattiḥ kiṁ jñātuṁ śakyate svayam || 7.8||

**भगवानुवाच**

उपासनादिभिः शुद्धं प्राग्जन्मसुकृतेन वा ।
दृष्टदोषं मनो यस्य शरीरे विषयेषु च ॥ ७.९ ॥

**bhagavānuvāca**

upāsanādibhiḥ śuddhaṁ prāgjanmasukṛtena vā ।
dṛṣṭadoṣaṁ mano yasya śarīre viṣayeṣu ca ।। 7.9।।

मनसा चरतो यस्य विषयेष्वरुचिर्भृशम् ।
देहे चानित्यता बुद्धिस्तं प्राहुरधिकारिणम् ॥ ७.१० ॥

manasā carato yasya viṣayeṣvarucirbhṛśam ।
dehe cānityatā buddhistaṁ prāhuradhikāriṇam ।। 7.10।।

देहे नश्वरताबुद्धेर्वैराग्याद्विषयेषु च ।
एताभ्यामेव लिङ्गाभ्यां ज्ञेया स्वस्याधिकारिता ॥ ७.११ ॥

dehe naśvaratābuddhervairāgyādviṣayeṣu ca ।
etābhyāmeva liṅgābhyāṁ jñeyā svasyādhikāritā ।। 7.11।।

**कार्ष्णिरुवाच**

स्नानं सन्ध्याजपो होमः स्वाध्यायो देवपूजनम् ।
संङ्कीर्तनं तीर्थयात्रा यज्ञो दानं व्रतानि च ॥ ७.१२ ॥

**kārṣṇiruvāca**

snānaṁ sandhyājapo homaḥ svādhyāyo devapūjanam ।
saṅṅkīrtanaṁ tīrthayātrā yajño dānaṁ vratāni ca ।। 7.12।।

विचारे साधिकारस्य वैराग्याच्च विवेकतः ।
किं वा प्रयोजनाय स्युरुत कालविधूतये ॥ ७.१३ ॥

vicāre sādhikārasya vairāgyācca vivekataḥ ।
kiṁ vā prayojanāya syuruta kālavidhūtaye ।। 7.13।।

**भगवानुवाच**

आरम्भिणां क्षीयमाणरागाणामधिकारिणाम् ।
कर्माण्येतानि सर्वाणि भूयस्यै चित्तशुद्धये ॥ ७.१४ ॥

**bhagavānuvāca**
ārambhiṇāṁ kṣīyamāṇarāgāṇāmadhikāriṇām |
karmāṇyetāni sarvāṇi bhūyasyai cittaśuddhaye || 7.14||

यत्कर्म सुकृतं प्रोक्तं मनोवाक्कायसंभवम् ।
तत्तु कर्मान्तरं हन्ति मनोवाक्कायसंभवम् ॥ ७.१५ ॥

yatkarma sukṛtaṁ proktaṁ manovākkāyasambhavam |
tattu karmāntaraṁ hanti manovākkāyasambhavam || 7.15||

अत्यन्तशुद्धमनसां पक्वानामधिकारिणाम् ।
इदं लोकोपकाराय कर्मजालं भविष्यति ॥ ७.१६ ॥

atyantaśuddhamanasāṁ pakvānāmadhikāriṇām |
idaṁ lokopakārāya karmajālaṁ bhaviṣyati || 7.16||

परेषामुपदेशाय क्षेमाय च मनीषिणः ।
पक्वाश्च कर्म कुर्वन्ति भयान्नादेशशास्त्रतः ॥ ७.१७ ॥

pareṣāmupadeśāya kṣemāya ca manīṣiṇaḥ |
pakvāśca karma kurvanti bhayānnādeśaśāstrataḥ || 7.17||

विचारप्रतिकूलानि न पुण्यानि नरर्षभ ।
क्रियमाणान्यसङ्गेन भेदबुद्ध्युपमर्दिना ॥ ७.१८ ॥

vicārapratikūlāni na puṇyāni nararṣabha |
kriyamāṇānyasaṅgena bhedabuddhyupamardinā || 7.18||

न चाकृतानि पापाय पक्वस्यात्मविमर्शिनः ।
स्वविमर्शो महत्पुण्यं पावनानां हि पावनम् ॥ ७.१९ ॥
na cākṛtāni pāpāya pakvasyātmavimarśinaḥ |
svavimarśo mahatpuṇyaṁ pāvanānāṁ hi pāvanam || 7.19||

दृश्यते द्विविधा निष्ठा पक्वानामधिकारिणाम् ।
त्याग एकान्तयोगाय परार्थं च क्रियादरः ॥ ७.२० ॥
dṛśyate dvividhā niṣṭhā pakvānāmadhikāriṇām |
tyāga ekāntayogāya parārthaṁ ca kriyādaraḥ || 7.20||

**कार्ष्णिरुवाच**
निर्वाणायास्ति चेदन्यो मार्ग आत्मविचारतः ।
एको वा विविधस्तं मे भगवान्वक्तुमर्हति ॥ ७.२१ ॥
**kārṣṇiruvāca**
nirvāṇāyāsti cedanyo mārga ātmavicārataḥ |
eko vā vividhastaṁ me bhagavānvaktumarhati || 7.21||

**भगवानुवाच**
एकः प्राप्तुं प्रयतते परः प्राप्तारमृच्छति ।
चिराय प्रथमो गच्छन्प्राप्नोत्यात्मानमन्ततः ॥ ७.२२ ॥
**bhagavānuvāca**
ekaḥ prāptuṁ prayatate paraḥ prāptāramṛcchati |
cirāya prathamo gacchanprāpnotyātmānamantataḥ || 7.22||

एकस्य ध्यानतश्चित्तमेकाकृति भविष्यति ।
एकाकृतित्वं चित्तस्य स्वरूपे स्थितये भवेत् ॥ ७.२३ ॥
ekasya dhyānataścittamekākṛti bhaviṣyati |
ekākṛtitvaṁ cittasya svarūpe sthitaye bhavet || 7.23||

अनिच्छयाप्यतो ध्यायन्विन्दत्यात्मनि संस्थितिम् ।
विचारकस्तु विज्ञाय भवेदात्मनि संस्थितः ॥ ७.२४ ॥

anicchayāpyato dhyāyanvindatyātmani saṁsthitim |
vicārakastu vijñāya bhavedātmani saṁsthitaḥ || 7.24||

ध्यायतो देवतां मन्त्रमन्यद्वा लक्ष्यमुत्तमम् ।
ध्येयमात्ममहाज्योतिष्यन्ततो लीनतां व्रजेत् ॥ ७.२५ ॥

dhyāyato devatāṁ mantramanyadvā lakṣyamuttamam |
dhyeyamātmamahājyotiṣyantato līnatāṁ vrajet || 7.25||

गतिरेवं द्वयोरेका ध्यातुश्चात्मविमर्शिनः ।
ध्यायन्नेकः प्रशान्तः स्यादन्यो विज्ञाय शाम्यति ॥ ७.२६ ॥

gatirevaṁ dvayorekā dhyātuścātmavimarśinaḥ |
dhyāyannekaḥ praśāntaḥ syādanyo vijñāya śāmyati || 7.26||

इति श्रीरमणगीतासु ब्रह्मविद्यायां योगशास्त्रे रमणान्तेवासिनो वासिष्ठस्य गणपतेरुपनिबन्धे आत्मविचाराधिकारितदङ्गनिरूपणं नाम सप्तमोऽध्यायः

iti śrīramaṇagītāsu brahmavidyāyāṁ yogaśāstre ramaṇāntevāsino vāsiṣṭhasya gaṇapaterupanibandhe ātmavicārādhikāritadaṅganirūpaṇaṁ nāma saptamo'dhyāyaḥ

# अष्टमोऽध्यायः
## aṣṭamo'dhyāyaḥ

## आश्रमविचारः
## āśramavicāraḥ

काष्र्णेरेवापरं प्रश्नं निशम्य भगवान्मुनिः ।
चातुराश्रम्यसम्बद्धमधिकारं न्यरूपयत् ॥ ८.१ ॥
kārṣṇerevāparaṁ praśnaṁ niśamya bhagavānmuniḥ |
cāturāśramyasambaddhamadhikāraṁ nyarūpayat || 8.1||

ब्रह्मचारी गृही वाऽपि वानप्रस्थोऽथवा यतिः
नारी वा वृषलो वापि पक्वो ब्रह्म विचारयेत् ॥ ८.२ ॥
brahmacārī gṛhī vā'pi vānaprastho'thavā yatiḥ
nārī vā vṛṣalo vāpi pakvo brahma vicārayet || 8.2||

सोपानवत्परं प्राप्तुं भविष्यत्याश्रमक्रमः ।
अत्यन्तपक्वचित्तस्य क्रमापेक्षा न विद्यते ॥ ८.३ ॥
sopānavatparaṁ prāptuṁ bhaviṣyatyāśramakramaḥ |
atyantapakvacittasya kramāpekṣā na vidyate || 8.3||

गतये लोककार्याणा-मादिशन्त्याश्रमक्रमम्।
आश्रमत्रयधर्माणां न ज्ञानप्रतिकूलता॥ ८.४॥
gataye lokakāryāṇā-mādiśantyāśramakramam |
āśramatrayadharmāṇāṁ na jñānapratikūlatā || 8.4||

सन्न्यासो निर्मलं ज्ञानं न काषायो न मुण्डनम्।
प्रतिबन्धकबाहुल्य-वारणायाश्रमो मतः॥ ८.५॥
sannyāso nirmalaṁ jñānaṁ na kāṣāyo na muṇḍanam |
pratibandhakabāhulya-vāraṇāyāśramo mataḥ || 8.5||

ब्रह्मचर्याश्रमे यस्य शक्तिरुज्जृम्भते व्रतैः।
विद्यया ज्ञानवृद्ध्या च स पश्चात्प्रज्वलिष्यति॥ ८.६॥
brahmacaryāśrame yasya śaktirujjṛmbhate vrataiḥ |
vidyayā jñānavṛddhyā ca sa paścātprajvaliṣyati || 8.6||

ब्रह्मचर्येण शुद्धेन गृहीत्वे निर्मलो भवेत्।
सर्वेषामुपकाराय गृहस्थाश्रम उच्यते॥ ८.७॥
brahmacaryeṇa śuddhena gṛhītve nirmalo bhavet |
sarveṣāmupakārāya gṛhasthāśrama ucyate || 8.7||

सर्वधा वीतसङ्गस्य गृहस्थस्यापि देहिनः।
परं प्रस्फुरति ज्योतिस्तत्र नैवास्ति संशयः॥ ८.८॥
sarvadhā vītasaṅgasya gṛhasthasyāpi dehinaḥ |
paraṁ prasphurati jyotistatra naivāsti saṁśayaḥ || 8.8||

तपसस्त्वाश्रमः प्रोक्तस्तृतीयः पण्डितोत्तमैः ।
अभार्यो वा सभार्यो वा तृतीयाश्रमभाग्भवेत् ॥ ८.९ ॥
tapasastvāśramaḥ proktastṛtīyaḥ paṇḍitottamaiḥ |
abhāryo vā sabhāryo vā tṛtīyāśramabhāgbhavet || 8.9||

तपसा दग्धपापस्य पक्वचित्तस्य योगिनः ।
चतुर्थ आश्रमः काले स्वयमेव भविष्यति ॥ ८.१० ॥
tapasā dagdhapāpasya pakvacittasya yoginaḥ |
caturtha āśramaḥ kāle svayameva bhaviṣyati || 8.10||

एष प्रागुक्त एवाब्देत्वष्टमे द्वादशे पुनः ।
उपदेशो भगवतः सप्तमाष्टमयोरभूत् ॥ ८.११ ॥
eṣa prāgukta evābdetvaṣṭame dvādaśe punaḥ |
upadeśo bhagavataḥ saptamāṣṭamayorabhūt || 8.11||

इति श्रीरमणगीतासु ब्रह्मविद्यायां योगशास्त्रे रमणान्तेवासिनो
वासिष्ठस्य गणपतेरुपनिबन्धे आश्रमविचारो नाम अष्टमोऽध्यायः
iti śrīramaṇagītāsu brahmavidyāyāṁ yogaśāstre ramaṇāntevāsino
vāsiṣṭhasya gaṇapaterupanibandhe āśramavicāro nāma
aṣṭamo'dhyāyaḥ

# नवमोऽध्यायः
## navamo'dhyāyaḥ

# ग्रन्थिभेदकथनम्
## granthibhedakathanam

चतुर्दशेऽष्टमे रात्रौ महर्षिं पृष्टवानहम्।
ग्रन्थिभेदं समुद्दिश्य विदुषां यत्र संशयः॥ ८.१॥
caturdaśe'ṣṭame rātrau maharṣiṁ pṛṣṭavānaham |
granthibhedaṁ samuddiśya viduṣāṁ yatra saṁśayaḥ || 9.1||

समाकर्ण्य मम प्रश्नं रमणो भगवानृषिः।
ध्यात्वा दिव्येन भावेन किञ्चिदाह महामहाः॥ ८.२॥
samākarṇya mama praśnaṁ ramaṇo bhagavānṛṣiḥ |
dhyātvā divyena bhāvena kiñcidāha mahāmahāḥ || 9.2||

शरीरस्यात्मनश्चापि सम्बन्धो ग्रन्थिरुच्यते।
सम्बन्धेनैव शारीरं भवति ज्ञानमात्मनः॥ ८.३॥
śarīrasyātmanaścāpi sambandho granthirucyate |
sambandhenaiva śārīraṁ bhavati jñānamātmanaḥ || 9.3||

शरीरं जडमेतस्यादात्मा चैतन्यमिष्यते ।
उभयोरपि सम्बन्धो विज्ञानेनानुमीयते ॥ ८.४ ॥
śarīraṁ jaḍametasyādātmā caitanyamiṣyate |
ubhayorapi sambandho vijñānenānumīyate || 9.4||

चैतन्यच्छाययाश्लिष्टं शरीरं तात चेष्टते ।
निद्रादौ ग्रहणाभावा-दूह्यते स्थानमात्मनः ॥ ८.५ ॥
caitanyacchāyayāśliṣṭaṁ śarīraṁ tāta ceṣṭate |
nidrādau grahaṇābhāvā-dūhyate sthānamātmanaḥ || 9.5||

सूक्ष्माणां विद्युदादीनां स्थूले तन्त्र्यादिके यथा ।
तथा कलेबरे नाड्यां चैतन्यज्योतिषो गतिः ॥ ८.६ ॥
sūkṣmāṇāṁ vidyudādīnāṁ sthūle tantryādike yathā |
tathā kalebare nāḍyāṁ caitanyajyotiṣo gatiḥ || 9.6||

स्थलमेकमुपाश्रित्य चैतन्यज्योतिरुज्ज्वलम् ।
सर्वं भासयते देहं बास्करो भुवनं यथा ॥ ८.७ ॥
sthalamekamupāśritya caitanyajyotirujjvalam |
sarvaṁ bhāsayate dehaṁ bāskaro bhuvanaṁ yathā || 9.7||

व्याप्तेन तत्प्रकाशेन शरीरे त्वनुभूतयः ।
स्थलं तदेव हृदयं सूरयस्सम्प्रचक्षते ॥ ८.८ ॥
vyāptena tatprakāśena śarīre tvanubhūtayaḥ |
sthalaṁ tadeva hṛdayaṁ sūrayassampracakṣate || 9.8||

नाडीशक्तिविलासेन चैतन्यांशुगतिर्मता ।
देहस्य शक्तयस्सर्वाः पृथङ्नाडीरुपाश्रिताः ॥ ८.९ ॥
nāḍīśaktivilāsena caitanyāṁśugatirmatā |
dehasya śaktayassarvāḥ pṛthaṅnāḍīrupāśritāḥ || 9.9||

चैतन्यं तु पृथङ्नाड्यां तां सुषुम्नां प्रचक्षते ।
आत्मनाडीं परामेके परेत्वमृतनाडिकाम् ॥ ८.१० ॥
caitanyaṁ tu pṛthaṅnāḍyāṁ tāṁ suṣumnāṁ prackṣate |
ātmanāḍīṁ parāmeke paretvamṛtanāḍikām || 9.10||

सर्वं देहं प्रकाशेन व्याप्तो जीवोऽभिमानवान् ।
मन्यते देहमात्मानं तेन भिन्नं च विष्टपम् ॥ ८.११ ॥
sarvaṁ dehaṁ prakāśena vyāpto jīvo'bhimānavān |
manyate dehamātmānaṁ tena bhinnaṁ ca viṣṭapam || 9.11||

अभिमानं परित्यज्य देहे चात्मधियं सुधीः ।
विचारयेच्चेदेकाग्रो नाडीनां मथनं भवेत् ॥ ८.१२ ॥
abhimānaṁ parityajya dehe cātmadhiyaṁ sudhīḥ |
vicārayeccedekāgro nāḍīnāṁ mathanaṁ bhavet || 9.12||

नाडीनां मथनेनैवमात्मा ताभ्यः पृथक्कृतः ।
केवलाममृतां नाडीमाश्रित्य प्रज्वलिष्यति ॥ ८.१३ ॥
nāḍīnāṁ mathanenaivamātmā tābhyaḥ pṛthakkṛtaḥ |
kevalāmamṛtāṁ nāḍīmāśritya prajvaliṣyati || 9.13||

आत्मनाड्यां यदा भाति चैतन्यज्योतिरुज्ज्वलम् ।
केवलायां तदा नान्यदात्मनस्सम्प्रभासते ॥ ८.१४ ॥
ātmanāḍyāṁ yadā bhāti caitanyajyotirujjvalam |
kevalāyāṁ tadā nānyadātmanassamprabhāsate || 9.14||

सान्निध्याद्भासमानं वा न पृथक्प्रतितिष्ठति ।
जानाति स्पष्टमात्मानं सदेहमिव पामरः ॥ ८.१५ ॥
sānnidhyādbhāsamānaṁ vā na pṛthakpratitiṣṭhati |
jānāti spaṣṭamātmānaṁ sadehamiva pāmaraḥ || 9.15||

आत्मैव भासते यस्य बहिरन्तश्च सर्वतः ।
पामरस्येव रूपादि स भिन्नग्रन्थिरुच्यते ॥ ८.१६ ॥
ātmaiva bhāsate yasya bahirantaśca sarvataḥ |
pāmarasyeva rūpādi sa bhinnagranthirucyate || 9.16||

नाडीबन्धोऽभिमानश्च द्वयं ग्रन्थिरुदीर्यते ।
नाडीबन्धेन सूक्ष्मोऽपि स्थूलं सर्वं प्रपश्यति ॥ ८.१७ ॥
nāḍībandho'bhimānaśca dvayaṁ granthirudīryate |
nāḍībandhena sūkṣmo'pi sthūlaṁ sarvaṁ prapaśyati || 9.17||

निवृत्तं सर्वनाडीभ्यो यदैकां नाडिकां श्रितम् ।
भिन्नग्रन्थि तदा ज्योतिरात्मभावाय कल्पते ॥ ८.१८ ॥
nivṛttaṁ sarvanāḍībhyo yadaikāṁ nāḍikāṁ śritam |
bhinnagranthi tadā jyotirātmabhāvāya kalpate || 9.18||

अग्नितप्तमयोगोलं दृश्यतेऽग्निमयं यथा।
स्वविचाराग्निसन्तप्तं तथेदं स्वमयं भवेत्॥ ८.१९॥
agnitaptamayogolaṁ dṛśyate'gnimayaṁ yathā |
svavicārāgnisantaptaṁ tathedaṁ svamayaṁ bhavet || 9.19||

शरीरादिजुषां पूर्ववासनानां क्षयस्तदा।
कर्तृत्वमशरीरत्वान्नैव तस्य भविष्यति॥ ८.२०॥
śarīrādijuṣāṁ pūrvavāsanānāṁ kṣayastadā |
kartṛtvamaśarīratvānnaiva tasya bhaviṣyati || 9.20||

कर्तृत्वाभावतः कर्म-विनाशोऽस्य समीरितः।
तस्य वस्त्वन्तराभावात्संशयानामनुद्भवः॥ ८.२१॥
kartṛtvābhāvataḥ karma-vināśo'sya samīritaḥ |
tasya vastvantarābhāvātsaṁśayānāmanudbhavaḥ || 9.21||

भविता न पुनर्बद्धो विभिन्नग्रन्थिरेकदा।
सा स्थितिः परमा शक्तिस्सा शान्तिः परमा मता॥ ८.२२॥
bhavitā na punarbaddho vibhinnagranthirekadā |
sā sthitiḥ paramā śaktissā śāntiḥ paramā matā || 9.22||

इति श्रीरमणगीतासु ब्रह्मविद्यायां योगशास्त्रे रमणान्तेवासिनो
वासिष्ठस्य गणपतेरुपनिबन्धे ग्रन्थिभेदकथनं नाम नवमोऽध्यायः
iti śrīramaṇagītāsu brahmavidyāyāṁ yogaśāstre ramaṇāntevāsino
vāsiṣṭhasya gaṇapaterupanibandhe granthibhedakathanaṁ
nāma navamo'dhyāyaḥ

# दशमोऽध्यायः
# daśamo'dhyāyaḥ

## सङ्घविद्या
## saṅghavidyā

यतिनो योगनाथस्य महर्षिरमणस्य च ।
दशमेऽत्र निबध्नीस्संवादं सङ्घहर्षदम् ॥ १०.१ ॥
yatino yoganāthasya maharṣiramaṇasya ca |
daśame'tra nibadhnīssaṁvādaṁ saṅghaharṣadam || 10.1||

**योगनाथ उवाच**
साङ्घिकस्य च सङ्घस्य कस्सम्बन्धो महामुने ।
सङ्घस्य श्रेयसे नाथ तमेतं वक्तुमर्हसि ॥ १०.२ ॥
**yoganātha uvāca**
sāṅghikasya ca saṅghasya kassambandho mahāmune |
saṅghasya śreyase nātha tametaṁ vaktumarhasi || 10.2||

**भगवानुवाच**
ज्ञेयश्शरीरवत्सङ्घस्तत्तदाचारशालिनाम् ।
अङ्गानीवात्र विज्ञेयास्साङ्घिकास्साधुसत्तम ॥ १०.३ ॥
**bhagavānuvāca**
jñeyaśśarīravatsaṅghastattadācāraśālinām |
aṅgānīvātra vijñeyāssāṅghikāssādhusattama || 10.3||

अङ्गं यथा शरीरस्य करोत्युपकृतिं यते।
तथोपकारं सङ्घस्य कुर्वन्जयति साङ्घिकः॥ १०.४॥

aṅgaṁ yathā śarīrasya karotyupakṛtiṁ yate |
tathopakāraṁ saṅghasya kurvanjayati sāṅghikaḥ || 10.4||

सङ्घस्य वाङ्मनः कायैरुपकारो यथा भवेत्।
स्वयं तथाऽऽचरन्नित्यं स्वकीयानपि बोधयेत्॥ १०.५॥

saṅghasya vāṅmanaḥ kāyairupakāro yathā bhavet |
svayaṁ tathā''carannityaṁ svakīyānapi bodhayet || 10.5||

आनुकूल्येन सङ्घस्य स्थापयित्वा निजं कुलम्।
सङ्घस्यैव ततो भूत्यै कुर्याद्भूतियुतं कुलम्॥ १०.६॥

ānukūlyena saṅghasya sthāpayitvā nijaṁ kulam |
saṅghasyaiva tato bhūtyai kuryādbhūtiyutaṁ kulam || 10.6||

**योगनाथ उवाच**

शान्तिं केचित्प्रशंसन्ति शक्तिं केचिन्मनीषिणः।
अनयोः को गुणो ज्यायांत्सङ्घ क्षेमकृते विभो॥ १०.७॥

**yoganātha uvāca**

śāntiṁ kecitpraśaṁsanti śaktiṁ kecinmanīṣiṇaḥ |
anayoḥ ko guṇo jyāyāntsaṅgha kṣemakṛte vibho || 10.7||

**भगवानुवाच**

स्वमनश्शुद्धये शान्तिश्शक्तिस्सङ्घस्य वृद्धये ।
शक्त्या सङ्घं विधायोच्चैश्शान्तिं संस्थापयेत्ततः ॥ १०.८ ॥

**bhagavānuvāca**

svamanaśśuddhaye śāntiśśaktissaṅghasya vṛddhaye |
śaktyā saṅghaṁ vidhāyoccaiśśāntiṁ saṁsthāpayettataḥ || 10.8||

**योगनाथ उवाच**

सर्वस्यापि च सङ्घस्य नराणामृषिकुञ्जर ।
गन्तव्यं समुदायेन किं परं धरणीतले ॥ १०.९ ॥

**yoganātha uvāca**

sarvasyāpi ca saṅghasya narāṇāmṛṣikuñjara |
gantavyaṁ samudāyena kiṁ paraṁ dharaṇītale || 10.9||

**भगवानुवाच**

समुदायेन सर्वस्य सङ्घस्य तनुधारिणाम् ।
सौभ्रात्रं समभावेन गन्तव्यं परमुच्यते ॥ १०.१० ॥

**bhagavānuvāca**

samudāyena sarvasya saṅghasya tanudhāriṇām |
saubhrātraṁ samabhāvena gantavyaṁ paramucyate || 10.10||

सौभ्रात्रेण परा शान्तिरन्योन्यं देहधारिणाम् ।
तदेयं शोभते सर्वा भूमिरेकं गृहं यथा ॥ १०.११ ॥

saubhrātreṇa parā śāntiranyonyaṁ dehadhāriṇām |
tadeyaṁ śobhate sarvā bhūmirekaṁ gṛhaṁ yathā || 10.11||

अभूत्पञ्चदशे घस्त्रे संवादस्सोऽयमष्टमे ।
योगनाथस्य यतिनो महर्षेश्च दयावतः ॥ १०.१२ ॥
abhūtpañcadaśe ghastre saṁvādasso'yamaṣṭame |
yoganāthasya yatino maharṣeśca dayāvataḥ || 10.12||

इति श्रीरमणगीतासु ब्रह्मविद्यायां योगशास्त्रे रमणान्तेवासिनो
वासिष्ठस्य गणपतेरुपनिबन्धे सङ्घविद्या नाम दशमोऽध्यायः
iti śrīramaṇagītāsu brahmavidyāyāṁ yogaśāstre ramaṇāntevāsino
vāsiṣṭhasya gaṇapaterupanibandhe saṅghavidyā nāma
daśamo'dhyāyaḥ

# एकादशोऽध्यायः
## ekādaśo'dhyāyaḥ

# ज्ञानसिद्धि-सामरस्यकथनम्
## jñānasiddhi-sāmarasyakathanam

षोडशे दिवसे रात्रौ विविक्ते मुनिसत्तमम्।
गुरुं ब्रह्मविदां श्रेष्ठं नित्यमात्मनि संस्थितम्॥ ११.१॥

ṣoḍaśe divase rātrau vivikte munisattamam |
guruṁ brahmavidāṁ śreṣṭhaṁ nityamātmani saṁsthitam
|| 11.1||

उपगम्य महाभागं सोऽहं कैतवमानवम्।
रमणं स्तुतवानस्मि दुर्लभज्ञानलब्धये॥ ११.२॥

upāgamya mahābhāgaṁ so'haṁ kaitavamānavam |
ramaṇaṁ stutavānasmi durlabhajñānalabdhaye || 11.2||

त्वय्येव परमा निष्ठा त्वय्येव विशदा मतिः।
अम्भसामिव वाराशिर्विज्ञानानां त्वमास्पदम्॥ ११.३॥

tvayyeva paramā niṣṭhā tvayyeva viśadā matiḥ |
ambhasāmiva vārāśirvijñānānāṁ tvamāspadam || 11.3||

त्वं तु सप्तदशे वर्षे बाल्य एव महायशः ।
लब्धवानसि विज्ञानं योगिनामपि दुर्लभम् ॥ ११.४ ॥

tvaṁ tu saptadaśe varṣe bālya eva mahāyaśaḥ |
labdhavānasi vijñānaṁ yogināmapi durlabham || 11.4||

सर्वे दृश्या इमे भावा यस्य छायामयास्तव ।
तस्य ते भगवन्निष्ठां को नु वर्णयितुं क्षमः ॥ ११.५ ॥

sarve dṛśyā ime bhāvā yasya chāyāmayāstava |
tasya te bhagavanniṣṭhāṁ ko nu varṇayituṁ kṣamaḥ || 11.5||

मज्जतां घोरसंसारे व्यापृतानामितस्ततः ।
दुःखं महत्तितीर्षूणां त्वमेका परमा गतिः ॥ ११.६ ॥

majjatāṁ ghorasaṁsāre vyāpṛtānāmitastataḥ |
duḥkhaṁ mahattitīrṣūṇāṁ tvamekā paramā gatiḥ || 11.6||

पश्यामि देवदत्तेन ज्ञानेन त्वां मुहुर्मुहुः ।
ब्रह्मण्यानां वरं ब्रह्मन् सुब्रह्मण्यं नराकृतिम् ॥ ११.७ ॥

paśyāmi devadattena jñānena tvāṁ muhurmuhuḥ |
brahmaṇyānāṁ varaṁ brahman subrahmaṇyaṁ narākṛtim || 11.7||

न त्वं स्वामिगिरौ नाथ न त्वं क्षणिकपर्वते ।
न त्वं वेङ्कटशैलाग्रे शोणाद्रावसि वस्तुतः ॥ ११.८ ॥

na tvaṁ svāmigirau nātha na tvaṁ kṣaṇikaparvate |
na tvaṁ veṅkaṭaśailāgre śoṇādrāvasi vastutaḥ || 11.8||

भूमविद्यां पुरा नाथ नारदाय महर्षये ।
भवांच्छुश्रूषमाणाय रहस्यामुपदिष्टवान् ॥ ११.९ ॥
bhūmavidyāṁ purā nātha nāradāya maharṣaye |
bhavāñcchuśrūṣamāṇāya rahasyāmupadiṣṭavān || 11.9||

सनत्कुमारं ब्रह्मर्षिं त्वामाहुर्वेदवेदिनः ।
आगमानां तु वेत्तारस्सुब्रह्मण्यं सुरर्षभम् ॥ ११.१० ॥
sanatkumāraṁ brahmarṣiṁ tvāmāhurvedavedinaḥ |
āgamānāṁ tu vettārassubrahmaṇyaṁ surarṣabham || 11.10||

केवलं नामभेदोऽयं व्यक्तिभेदो न विद्यते ।
सनत्कुमारस्स्कन्दश्च पर्यायौ तव तत्त्वतः ॥ ११.११ ॥
kevalaṁ nāmabhedo'yaṁ vyaktibhedo na vidyate |
sanatkumārasskandaśca paryāyau tava tattvataḥ || 11.11||

पुरा कुमारिलो नाम भूत्वा ब्राह्मणसत्तमः ।
धर्मं वेदोदितं नाथ त्वं संस्थापितवानसि ॥ ११.१२ ॥
purā kumārilo nāma bhūtvā brāhmaṇasattamaḥ |
dharmaṁ vedoditaṁ nātha tvaṁ saṁsthāpitavānasi || 11.12||

जैनैर्व्याकुलिते धर्मे भगवन्द्रविडेषु च ।
भूत्वा त्वं ज्ञानसम्बन्धो भक्तिं स्थापितवानसि ॥ ११.१३ ॥
jainairvyākulite dharme bhagavandraviḍeṣu ca |
bhūtvā tvaṁ jñānasambandho bhaktiṁ sthāpitavānasi || 11.13||

अधुना त्वं महाभाग ब्रह्मज्ञानस्य गुप्तये ।
शास्त्रज्ञानेन संतृप्तैर्निरुद्धस्यागतो धराम् ॥ ११.१४ ॥
adhunā tvaṁ mahābhāga brahmajñānasya guptaye |
śāstrajñānena santṛptairniruddhasyāgato dharām || 11.14||

सन्देहा बहवो नाथ शिष्याणां वारितास्त्वया ।
इमं च मम सन्देहं निवारयितुमर्हसि ॥ ११.१५ ॥
sandehā bahavo nātha śiṣyāṇāṁ vāritāstvayā |
imaṁ ca mama sandehaṁ nivārayitumarhasi || 11.15||

ज्ञानस्य चापि सिद्धीनां विरोधः किं परस्परम् ।
उताहो कोपि सम्बन्धो वर्तते मुनिकुञ्जर ॥ ११.१६ ॥
jñānasya cāpi siddhīnāṁ virodhaḥ kiṁ parasparam |
utāho kopi sambandho vartate munikuñjara || 11.16||

मयैवं भगवान्पृष्टो रमणो नुतिपूर्वकम् ।
गभीरया दृशा वीक्ष्य मामिदं वाक्यमब्रवित् ॥ ११.१७ ॥
mayaivaṁ bhagavānpṛṣṭo ramaṇo nutipūrvakam |
gabhīrayā dṛśā vīkṣya māmidaṁ vākyamabravit || 11.17||

सहजां स्थितिमारूढः स्वभावेन दिने दिने ।
तपश्चरति दुर्धर्षं नालस्यं सहजस्थितौ ॥ ११.१८ ॥
sahajāṁ sthitimārūḍhaḥ svabhāvena dine dine |
tapaścarati durdharṣaṁ nālasyaṁ sahajasthitau || 11.18||

तपस्तदेव दुर्धर्षं या निष्ठा सहजात्मनि ।
तेन नित्येन तपसा भवेत्पाकः क्षणे क्षणे ॥ ११.१९ ॥
tapastadeva durdharṣaṁ yā niṣṭhā sahajātmani |
tena nityena tapasā bhavetpākaḥ kṣaṇe kṣaṇe || 11.19||

परिपाकेन काले स्युः सिद्धयस्तात पश्यतः ।
प्रारब्धं यदि ताभिः स्याद्विहारो ज्ञानिनोऽपि च ॥ ११.२० ॥
paripākena kāle syuḥ siddhayastāta paśyataḥ |
prārabdhaṁ yadi tābhiḥ syādvihāro jñānino'pi ca || 11.20||

यथा प्रपञ्चग्रहणे स्वरूपान्नेतरन्मुनेः ।
सिद्धयः क्रियमाणाश्च स्वरूपान्नेतरत्तथा ॥ ११.२१ ॥
yathā prapañcagrahaṇe svarūpānnetaranmuneḥ |
siddhayaḥ kriyamāṇāśca svarūpānnetarattathā || 11.21||

भवेन्न यस्य प्रारब्धं शक्तिपूर्णोऽप्ययं मुनिः ।
अतरङ्ग इवाम्भोधिर्न किञ्चिदपि चेष्टते ॥ ११.२२ ॥
bhavenna yasya prārabdhaṁ śaktipūrṇo'pyayaṁ muniḥ |
ataraṅga ivāmbhodhirna kiñcidapi ceṣṭate || 11.22||

नान्यं मृगयते मार्गं निसर्गादात्मनि स्थितः ।
सर्वासामपि शक्तीनां समष्टिः स्वात्मनि स्थितः ॥ ११.२३ ॥
nānyaṁ mṛgayate mārgaṁ nisargādātmani sthitaḥ |
sarvāsāmapi śaktīnāṁ samaṣṭiḥ svātmani sthitaḥ || 11.23||

अप्रयत्नेन तु तपः सहजा स्थितिरुच्यते ।
सहजायां स्थितौ पाकाच्छक्तीनामुद्भवो मतः ॥ ११.२४ ॥
aprayatnena tu tapaḥ sahajā sthitirucyate |
sahajāyāṁ sthitau pākācchaktīnāmudbhavo mataḥ || 11.24||

परीवृतोऽपि बहुभिर्नित्यमात्मनि संस्थितः ।
घोरं तपश्चरत्येव न तस्यैकान्तकामिता ॥ ११.२५ ॥
parīvṛto'pi bahubhirnityamātmani saṁsthitaḥ |
ghoraṁ tapaścaratyeva na tasyaikāntakāmitā || 11.25||

ज्ञानं शक्तेरपेतं यो मन्यते नैव वेद सः ।
सर्वशक्तेऽभितः पूर्णे स्वस्वरूपे हि बोधवान् ॥ ११.२६ ॥
jñānaṁ śakteraepetaṁ yo manyate naiva veda saḥ |
sarvaśakte'bhitaḥ pūrṇe svasvarūpe hi bodhavān || 11.26||

इति श्रीरमणगीतासु ब्रह्मविद्यायां योगशास्त्रे रमणान्तेवासिनो
वासिष्ठस्य गणपतेरुपनिबन्धे ज्ञानसिद्धिसामरस्यकथनं नाम
एकादशोऽध्यायः
iti śrīramaṇagītāsu brahmavidyāyāṁ yogaśāstre ramaṇāntevāsino
vāsiṣṭhasya gaṇapaterupanibandhe
jñānasiddhisāmarasyakathanaṁ nāma ekādaśo'dhyāyaḥ

# द्वादशोऽध्यायः
# dvādaśo'dhyāyaḥ

## शक्तिविचारः
## śaktivicāraḥ

एकोनविंशे दिवसे भारद्वाजो महामनाः ।
कपाली कृतिषु ज्यायानपृच्छद्रमणं गुरुम् ॥ १२.१ ॥
ekonaviṁśe divase bhāradvājo mahāmanāḥ |
kapālī kṛtiṣu jyāyānapṛcchadramaṇaṁ gurum || 12.1||

**कपाल्युवाच**
विषयी विषयो वृत्तिरितीदं भगवंस्त्रिकम् ।
ज्ञानिनां पामराणां च लोकयात्रासु दृश्यते ॥ १२.२ ॥
**kapālyuvāca**
viṣayī viṣayo vṛttiritīdaṁ bhagavaṁstrikam |
jñāninām pāmarāṇāṁ ca lokayātrāsu dṛśyate || 12.2||

अथ केन विशेषेण ज्ञानी पामरतोऽधिकः ।
इमं मे नाथ सन्देहं निवर्तयितुमर्हसि ॥ १२.३ ॥
atha kena viśeṣeṇa jñānī pāmarato'dhikaḥ |
imaṁ me nātha sandehaṁ nivartayitumarhasi || 12.3||

**भगवानुवाच**
अभिन्नो विषयी यस्य स्वरूपान्मनुजर्षभ।
व्यापारविषयौ भातस्तस्याभिन्नौ स्वरूपतः॥ १२.४॥

**bhagavānuvāca**
abhinno viṣayī yasya svarūpānmanujarṣabha |
vyāpāraviṣayau bhātastasyābhinnau svarūpataḥ || 12.4||

विभिन्नो विषयी यस्य स्वरूपादभिमानिनः।
व्यापारविषयौ भातस्तस्य भिन्नौ स्वरूपतः॥ १२.५॥

vibhinno viṣayī yasya svarūpādabhimāninaḥ |
vyāpāraviṣayau bhātastasya bhinnau svarūpataḥ || 12.5||

भेदाबासे विजानाति ज्ञान्यभेदं तु तात्त्विकम्।
भेदाभासवशं गत्वा पामरस्तु विभिद्यते॥ १२.६॥

bhedābāse vijānāti jñānyabhedaṁ tu tāttvikam |
bhedābhāsavaśaṁ gatvā pāmarastu vibhidyate || 12.6||

**कपाल्युवाच**
नाथ यस्मिन्निमे भेदाबासन्ते त्रिपुटीमयाः।
शक्तिमद्वास्वरूपं तदुताहो शक्तिवर्जितम्॥ १२.७॥

**kapālyuvāca**
nātha yasminnime bhedābāsante tripuṭīmayāḥ |
śaktimadvāsvarūpaṁ tadutāho śaktivarjitam || 12.7||

**भगवानुवाच**

वत्स यस्मिन्निमे भेदा बासन्ते त्रिपुटीमयाः ।
सर्वशक्तं स्वरूपं तदाहुर्वेदान्तवेदिनः ॥ १२.८ ॥

**bhagavānuvāca**
vatsa yasminnime bhedā bāsante tripuṭīmayāḥ |
sarvaśaktaṁ svarūpaṁ tadāhurvedāntavedinaḥ || 12.8||

**कपाल्युवाच**

ईश्वरस्य तु या शक्तिर्गीता वेदान्तवेदिभिः ।
अस्ति वा चलनं तस्यामाहोस्विन्नाथ नास्ति वा ॥ १२.९ ॥

**kapālyuvāca**
īśvarasya tu yā śaktirgītā vedāntavedibhiḥ |
asti vā calanaṁ tasyāmāhosvinnātha nāsti vā || 12.9||

**भगवानुवाच**

शक्तेस्सञ्चलनादेव लोकानां तात सम्भवः ।
चलनस्याश्रयो वस्तु न सञ्चलति कर्हिचित् ॥ १२.१० ॥

**bhagavānuvāca**
śaktessañcalanādeva lokānāṁ tāta sambhavaḥ |
calanasyāśrayo vastu na sañcalati karhicit || 12.10||

अचलस्य तु यच्छक्तेश्चलनं लोककारणम् ।
तामेवाचक्षते मायामनिर्वाच्यां विपश्चितः ॥ १२.११ ॥

acalasya tu yacchakteścalanaṁ lokakāraṇam |
tāmevācakṣate māyāmanirvācyāṁ vipaścitaḥ|| 12.11||

चञ्चलत्वं विषयिणो यथार्थमिव भासते ।
चलनं न नरश्रेष्ठ स्वरूपस्य तु वस्तुतः ॥ १२.१२ ॥

cañcalatvaṁ viṣayiṇo yathārthamiva bhāsate |
calanaṁ na naraśreṣṭha svarūpasya tu vastutaḥ || 12.12||

ईश्वरस्य च शक्तेश्च भेदो दृष्टिनिमित्तकः ।
मिथुनं त्विदमेकं स्याद्दृष्टिश्चेदुपसंहृता ॥ १२.१३ ॥
īśvarasya ca śakteśca bhedo dṛṣṭinimittakaḥ |
mithunaṁ tvidamekaṁ syāddṛṣṭiścedupasaṁhṛtā || 12.13||

**कपाल्युवाच**
व्यापार ईश्वरस्यायं दृश्यब्रह्माण्डकोटिकृत् ।
नित्यः इमथावाऽनित्यो भगवान्वक्तुमर्हति ॥ १२.१४ ॥
**kapālyuvāca**
vyāpāra īśvarasyāyaṁ dṛśyabrahmāṇḍakoṭikṛt |
nityaḥ imathāvā'nityo bhagavānvaktumarhati || 12.14||

**भगवानुवाच**
निजया परया शक्त्या चलन्नप्यचलः परः ।
केवलं मुनिसंवेद्यं रहस्यमिदमुत्तमम् ॥ १२.१५ ॥
**bhagavānuvāca**
nijayā parayā śaktyā calannapyacalaḥ paraḥ |
kevalaṁ munisaṁvedyaṁ rahasyamidamuttamam || 12.15||

चलत्वमेव व्यापारो व्यापारश्शक्तिरुच्यते ।
शक्त्या सर्वमिदं दृश्यं ससर्ज परमः पुमान् ॥ १२.१६ ॥
calatvameva vyāpāro vyāpāraśśaktirucyate |
śaktyā sarvamidaṁ dṛśyaṁ sasarja paramaḥ pumān
|| 12.16||

व्यापारस्तु प्रवृत्तिश्च निवृत्तिरिति च द्विधा ।
निवृत्तिस्था यत्र सर्वमात्मैवाभूदिति श्रुतिः ॥ १२.१७ ॥
vyāpārastu pravṛttiśca nivṛttiriti ca dvidhā ।
nivṛttisthā yatra sarvamātmaivābhūditi śrutiḥ ।। 12.17।।

नानात्वं द्वैतकालस्थं गम्यते सर्वमित्यतः ।
अभूदिति पदेनात्र व्यापारः कोऽपि गम्यते ॥ १२.१८ ॥
nānātvaṁ dvaitakālasthaṁ gamyate sarvamityataḥ ।
abhūditi padenātra vyāpāraḥ ko'pi gamyate ।। 12.18।।

आत्मैवेति विनिर्देशाद्विशेषाणां समं ततः ।
आत्मन्येवोपसंहारस्तज्जातानां प्रकीर्तितः ॥ १२.१९ ॥
ātmaiveti vinirdeśādviśeṣāṇāṁ samaṁ tataḥ ।
ātmanyevopasaṁhārastajjātānāṁ prakīrtitaḥ ।। 12.19।।

विना शक्तिं नरश्रेष्ठ स्वरूपं न प्रतीयते ।
व्यापार आश्रयश्चेति द्विनामा शक्तिरुच्यते ॥ १२.२० ॥
vinā śaktiṁ naraśreṣṭha svarūpaṁ na pratīyate ।
vyāpāra āśrayaśceti dvināmā śaktirucyate ।। 12.20।।

व्यापारो विश्वसर्गादिकार्यमुक्तं मनीषिभिः ।
आश्रयो द्विपदांश्रेष्ठ स्वरूपान्नातिरिच्यते ॥ १२.२१ ॥
vyāpāro viśvasargādikāryamuktaṁ manīṣibhiḥ ।
āśrayo dvipadāṁśreṣṭha svarūpānnātiricyate ।। 12.21।।

स्वरूपमन्यसापेक्षं नैव सर्वात्मकत्वतः।
शक्तिं वृत्तिं स्वरूपं च य एवं वेदवेदसः॥ १२.२२॥
svarūpamanyasāpekṣaṁ naiva sarvātmakatvataḥ |
śaktiṁ vṛttiṁ svarūpaṁ ca ya evaṁ vedavedasaḥ || 12.22||

वृत्तेरभावे तु सतो नानाभावो न सिध्यति।
सत्ता शक्त्यतिरिक्ता चेद् वृत्तेर्नैव समुद्भवः॥ १२.२३॥
vṛtterabhāve tu sato nānābhāvo na sidhyati |
sattā śaktyatiriktā ced vṛtternaiva samudbhavaḥ || 12.23||

यदि कालेन भविता जगतः प्रलयो महान्।
अभेदेन स्वरूपेऽयं व्यापारो लीनवद्भवेत्॥ १२.२४॥
yadi kālena bhavitā jagataḥ pralayo mahān |
abhedena svarūpe'yaṁ vyāpāro līnavadbhavet || 12.24||

सर्वोऽपि व्यवहारोऽयं न भवेच्छक्तिमन्तरा।
न सृष्टिर्नापि विज्ञानं यदेतत् त्रिपुतीमयम्॥ १२.२५॥
sarvo'pi vyavahāro'yaṁ na bhavecchaktimantarā |
na sṛṣṭirnāpi vijñānaṁ yadetat triputīmayam || 12.25||

स्वरूपमाश्रयत्वेन व्यापारस्सर्गकर्मणा।
नामभ्यामुच्यते द्वाभ्यां शक्तिरेका परात्परा॥ १२.२६॥
svarūpamāśrayatvena vyāpārassargakarmaṇā |
nāmabhyāmucyate dvābhyāṁ śaktirekā parātparā || 12.26||

लक्षणं चलनं येषां शक्तेस्तेषां तदाश्रयः ।
यत्किंञ्चित्परमं वस्तु वक्तव्यं स्यान्नरर्षभ ॥ १२.२७ ॥
lakṣaṇaṁ calanaṁ yeṣāṁ śaktesteṣāṁ tadāśrayaḥ |
yatkiññcitparamaṁ vastu vaktavyaṁ syānnararṣabha || 12.27||

तदेकं परमं वस्तु शक्तिमेके प्रचक्षते ।
स्वरूपं केऽपि विद्वांसो ब्रह्मान्ये पुरुषं परे ॥ १२.२८ ॥
tadekaṁ paramaṁ vastu śaktimeke pracakṣate |
svarūpaṁ ke'pi vidvāṁso brahmānye puruṣaṁ pare || 12.28||

वत्स सत्यं द्विधा गम्यं लक्षणेन च वस्तुतः ।
लक्षणेनोच्यते सत्यं वस्तुतस्त्वनुभूयते ॥ १२.२९ ॥
vatsa satyaṁ dvidhā gamyaṁ lakṣaṇena ca vastutaḥ |
lakṣaṇenocyate satyaṁ vastutastvanubhūyate || 12.29||

तस्मात्स्वरूपविज्ञानं व्यापरेण च वस्तुतः ।
ताटस्थ्येन च साक्षाच्च द्विविधं सम्प्रच्क्षते ॥ १२.३० ॥
tasmātsvarūpavijñānaṁ vyāpareṇa ca vastutaḥ |
tāṭasthyena ca sākṣācca dvividhaṁ samprackṣate || 12.30||

स्वरूपमाश्रयं प्राहुर्व्यापारं तात लक्षणम् ।
वृत्त्या विज्ञाय तन्मूलमाश्रये प्रतितिष्ठति ॥ १२.३१ ॥
svarūpamāśrayaṁ prāhurvyāpāraṁ tāta lakṣaṇam |
vṛttyā vijñāya tanmūlamāśraye pratitiṣṭhati || 12.31||

स्वरूपं लक्षणोपेतं लक्षणं च स्वरूपवत् ।
तादात्म्येनैव सम्बन्धस्त्वनयोस्सम्प्रकीर्तितः ॥ १२.३२ ॥

svarūpaṁ lakṣaṇopetaṁ lakṣaṇaṁ ca svarūpavat |
tādātmyenaiva sambandhastvanayossamprakīrtitaḥ || 12.32||

तटस्थलक्षणेनैवं व्यापाराख्येन मारिष ।
यतो लक्ष्यं स्वरूपं स्यान्नित्यव्यापारवत्ततः ॥ १२.३३ ॥

taṭasthalakṣaṇenaivaṁ vyāpārākhyena māriṣa |
yato lakṣyaṁ svarūpaṁ syānnityavyāpāravattataḥ || 12.33||

व्यापारो वस्तुनो नान्यो यदि पश्यसि तत्त्वतः ।
इदं तु भेदविज्ञानं सर्वं काल्पनिकं मतम् ॥ १२.३४ ॥

vyāpāro vastuno nānyo yadi paśyasi tattvataḥ |
idaṁ tu bhedavijñānaṁ sarvaṁ kālpanikaṁ matam || 12.34||

शक्त्युल्लासाह्वया सेयं सृष्टिः स्यादीशकल्पना ।
कल्पनेयमतीता चेत्स्वरूपमवशिष्यते ॥ १२.३५ ॥

śaktyullāsāhvayā seyaṁ sṛṣṭiḥ syādīśakalpanā |
kalpaneyamatītā cetsvarūpamavaśiṣyate || 12.35||

इति श्रीरमणगीतासु ब्रह्मविद्यायां योगशास्त्रे रमणान्तेवासिनो
वासिष्ठस्य गणपतेरुपनिबन्धे शक्तिविचारो नाम द्वादशोऽध्यायः

iti śrīramaṇagītāsu brahmavidyāyāṁ yogaśāstre ramaṇāntevāsino
vāsiṣṭhasya gaṇapaterupanibandhe śaktivicāro nāma
dvādaśo'dhyāyaḥ

# त्रयोदशोऽध्यायः
# trayodaśo'dhyāyaḥ

## संन्यासे स्त्रीपुरुषयोस्तुल्याधिकारनिरूपणम्
## sannyāse strīpuruṣayostulyādhikāranirūpaṇam

अत्रीणामन्वयज्योत्स्ना वसिष्ठानां कुलस्नुषा ।
महादेवस्य जननी धीरस्य ब्रह्मवेदिनः ॥ १३.१ ॥

atrīṇāmanvayajyotsnā vasiṣṭhānāṁ kulasnuṣā |
mahādevasya jananī dhīrasya brahmavedinaḥ || 13.1||

प्रतिमानं पुरन्ध्रीणां लोकसेवाव्रते स्थिता ।
बिभ्राणा महतीं विद्यां ब्रह्मादिविबुधस्तुताम् ॥ १३.२ ॥

pratimānaṁ purandhrīṇāṁ lokasevāvrate sthitā |
bibhrāṇā mahatīṁ vidyāṁ brahmādivibudhastutām || 13.2||

दक्षिणे विन्ध्यतश्शक्तेस्तारिण्या आदिमा गुरुः ।
तपस्सखी मे दयिता विशालाक्षी यशस्विनी ॥ १३.३ ॥

dakṣiṇe vindhyataśśaktestāriṇyā ādimā guruḥ |
tapassakhī me dayitā viśālākṣī yaśasvinī || 13.3||

प्रश्नद्वयेन रमणाह्वयं विश्वहितं मुनिम् ।
अभ्यगच्छददुष्टाङ्गी निक्षिप्तेन मुखे मम ॥ १३.४ ॥

praśnadvayena ramaṇāhvayaṁ viśvahitaṁ munim |
abhyagacchadaduṣṭāṅgī nikṣiptena mukhe mama || 13.4||

आत्मस्थितानां नारीणामस्ति चेत्प्रतिबन्धकम् ।
गृहत्यागेन हंसीत्वं कुमु स्याच्छास्त्रसम्मतम् ॥ १३.५ ॥
ātmasthitānāṁ nārīṇāmasti cetpratibandhakam |
gṛhatyāgena haṁsītvaṁ kumu syācchāstrasammatam || 13.5||

जीवन्त्या एव मुक्ताया देहपातो भवेद्यदि ।
दहनं वा समाधिर्वा कार्यं युक्तमनन्तरम् ॥ १३.६ ॥
jīvantyā eva muktāyā dehapāto bhavedyadi |
dahanaṁ vā samādhirvā kāryaṁ yuktamanantaram || 13.6||

प्रश्नद्वयमिदं श्रुत्वा भगवानृषिसत्तमः ।
अवोचन्निर्णयं तत्र सर्वशास्त्रार्थतत्त्ववित् ॥ १३.७ ॥
praśnadvayamidaṁ śrutvā bhagavānṛṣisattamaḥ |
avocannirṇayaṁ tatra sarvaśāstrārthatattvavit || 13.7||

स्वरूपे वर्तमानानां पक्वानां योषितामपि ।
निवृत्तत्वान्निषेधस्य हंसीत्वं नैव दुष्यति ॥ १३.८ ॥
svarūpe vartamānānāṁ pakvānāṁ yoṣitāmapi |
nivṛttatvānniṣedhasya haṁsītvaṁ naiva duṣyati || 13.8||

मुक्तत्वस्याऽविशिष्टत्वाद्बोधस्य च वधूरपि ।
जीवन्मुक्ता न दाह्या स्यात्तद्देहो हि सुरालयः ॥ १३.९ ॥
muktatvasyā'viśiṣṭatvādbodhasya ca vadhūrapi |
jīvanmuktā na dāhyā syāttaddeho hi surālayaḥ || 13.9||

ये दोषा देहदहने पुंसो मुक्तस्य संस्मृताः।
मुक्तायास्सन्ति ते सर्वे देहदाहे च योषितः॥ १३.१०॥

ye doṣā dehadahane puṁso muktasya saṁsmṛtāḥ |
muktāyāssanti te sarve dehadāhe ca yoṣitaḥ || 13.10||

एकविंशेऽह्नि गीतोऽभूदयमर्थो मनीषिणा।
अधिकृत्य ज्ञानवतीं रमणेन महर्षिणा॥ १३.११॥

ekaviṁśe'hni gīto'bhūdayamartho manīṣiṇā |
adhikṛtya jñānavatīṁ ramaṇena maharṣiṇā || 13.11||

इति श्रीरमणगीतासु ब्रह्मविद्यायां योगशास्त्रे रमणान्तेवासिनो
वासिष्ठस्य गणपतेरुपनिबन्धे संन्यासे स्त्रीपुरुषयोस्तुल्याधिकारनिरूपणं
नाम त्रयोदशोऽध्यायः

iti śrīramaṇagītāsu brahmavidyāyāṁ yogaśāstre ramaṇāntevāsino
vāsiṣṭhasya gaṇapaterupanibandhe sannyāse
strīpuruṣayostulyādhikāranirūpaṇaṁ nāma trayodaśo'dhyāyaḥ

# चतुर्दशोऽध्यायः
**caturdaśo'dhyāyaḥ**

# जीवन्मुक्तिविचारः
**jīvanmuktivicāraḥ**

निशायामेकविंशेऽह्नि भारद्वाजो विदांवरः।
प्राज्ञश्शिवकुलोपाधिर्वैदर्भो वदतां वरः॥ १४.१॥
niśāyāmekaviṁśe'hni bhāradvājo vidāṁvaraḥ |
prājñaśśivakulopādhirvaidarbho vadatāṁ varaḥ || 14.1||
जीवन्मुक्तिं समुद्दिश्य महर्षिं परिपृष्टवान्।
अथ सर्वेषु शृण्वत्सु महर्षिर्वाक्यमब्रवीत्॥ १४.२॥
jīvanmuktiṁ samuddiśya maharṣiṁ paripṛṣṭavān |
atha sarveṣu śṛṇvatsu maharṣirvākyamabravīt || 14.2||

शास्त्रीयैर्लौकिकैश्चापि प्रत्ययैरविचालिता।
स्वरूपे सुदृढा निष्ठा जीवन्मुक्तिरुदाहृता॥ १४.३॥
śāstrīyairlaukikaiścāpi pratyayairavicālitā |
svarūpe sudṛḍhā niṣṭhā jīvanmuktirudāhṛtā || 14.3||

मुक्तिरेकविधैव स्यात्प्रज्ञानस्याविशेषतः।
शरीरस्थं मुक्तबन्धं जीवन्मुक्तं प्रचक्षते॥ १४.४॥
muktirekavidhaiva syātprajñānasyāviśeṣataḥ |
śarīrasthaṁ muktabandhaṁ jīvanmuktaṁ pracakṣate || 14.4||

ब्रह्मलोकगतो मुक्तश्श्रूयते निगमेषु यः।
अनुभूतौ न भेदोऽस्ति जीवन्मुक्तस्य तस्य च॥ १४.५॥
brahmalokagato muktaśśrūyate nigameṣu yaḥ |
anubhūtau na bhedo'sti jīvanmuktasya tasya ca || 14.5||

प्राणाः समवलीयन्ते यस्यात्रैव महात्मनः।
तस्याप्यनुभवो विद्वन्नेतयोरुभयोरिव॥ १४.६॥
prāṇāḥ samavalīyante yasyātraiva mahātmanaḥ |
tasyāpyanubhavo vidvannetayorubhayoriva || 14.6||

साम्यात्स्वरूपनिष्ठाया बन्धहानेश्च साम्यतः।
मुक्तिरेकविधैव स्याद्भेदस्तु परबुद्धिगः॥ १४.७॥
sāmyātsvarūpaniṣṭhāyā bandhahāneśca sāmyataḥ |
muktirekavidhaiva syādbhedastu parabuddhigaḥ || 14.7||

मुक्तो भवति जीवन्यो महात्मात्मनि संस्थितः।
प्राणाः समवलीयन्ते तस्यैवात्र नरर्षभ॥ १४.८॥
mukto bhavati jīvanyo mahātmātmani saṁsthitaḥ |
prāṇāḥ samavalīyante tasyaivātra nararṣabha || 14.8||

जीवन्मुक्तस्य कालेन तपसः परिपाकतः।
स्पर्शाभावोऽपि सिद्धः स्याद्रूपे सत्यपि कुत्रचित्॥ १४.९॥
jīvanmuktasya kālena tapasaḥ paripākataḥ |
sparśābhāvo'pi siddhaḥ syādrūpe satyapi kutracit || 14.9||

भूयश्च परिपाकेन रूपाभावोऽपि सिद्ध्यति ।
केवलं चिन्मयो भूत्वा स सिद्धो विहरिष्यति ॥ १४.१० ॥
bhūyaśca paripākena rūpābhāvo'pi siddhyati |
kevalaṁ cinmayo bhūtvā sa siddho vihariṣyati || 14.10||

शरीरसंश्रयं सिद्ध्योर्द्वयमेतन्नरोत्तम ।
अल्पेनापि च कालेन देवतानुग्रहाद्भवेत् ॥ १४.११ ॥
śarīrasaṁśrayaṁ siddhyordvayametannarottama |
alpenāpi ca kālena devatānugrahādbhavet || 14.11||

भेदमेतं पुरस्कृत्य तारतम्यं न सम्पदि ।
देहवानशरीरो वा मुक्त आत्मनि संस्थितः ॥ १४.१२ ॥
bhedametaṁ puraskṛtya tāratamyaṁ na sampadi |
dehavānaśarīro vā mukta ātmani saṁsthitaḥ || 14.12||

नाडीद्वारार्चिराद्येन मार्गेणोर्ध्वगतिर्नरः ।
तत्रोत्पन्नेन बोधेन सद्यो मुक्तो भविष्यति ॥ १४.१३ ॥
nāḍīdvārārcirādyena mārgeṇordhvagatirnaraḥ |
tatrotpannena bodhena sadyo mukto bhaviṣyati || 14.13||

उपासकस्य सुतरां पक्वचित्तस्य योगिनः ।
ईश्वरानुग्रहात्प्रोक्ता नाडीद्वारोत्तमा गतिः ॥ १४.१४ ॥
upāsakasya sutarāṁ pakvacittasya yoginaḥ |
īśvarānugrahātproktā nāḍīdvārottamā gatiḥ || 14.14||

सर्वेषु कामचारोऽस्य लोकेषु परिकीर्तितः ।
इच्छयानेकदेहानां ग्रहणं चाप्यनुग्रहः ॥ १४.१५ ॥
sarveṣu kāmacāro'sya lokeṣu parikīrtitaḥ |
icchayānekadehānāṁ grahaṇaṁ cāpyanugrahaḥ || 14.15||

कैलासं केऽपि मुक्तानां लोकमाहुर्मनीषिणः ।
एके वदन्ति वैकुण्ठं परे त्वादित्यमण्डलम् ॥ १४.१६ ॥
kailāsaṁ ke'pi muktānāṁ lokamāhurmanīṣiṇaḥ |
eke vadanti vaikuṇṭhaṁ pare tvādityamaṇḍalam || 14.16||

मुक्तलोकाश्च ते सर्वे विद्वन्भूम्यादिलोकवत् ।
चित्रवैभवया शक्त्या स्वरूपे परिकल्पिताः ॥ १४.१७ ॥
muktalokāśca te sarve vidvanbhūmyādilokavat |
citravaibhavayā śaktyā svarūpe parikalpitāḥ || 14.17||

इति श्रीरमणगीतासु ब्रह्मविद्यायां योगशास्त्रे रमणान्तेवासिनो
वासिष्ठस्य गणपतेरुपनिबन्धे जीवन्मुक्तिविचारो नाम चतुर्दशोऽध्यायः
iti śrīramaṇagītāsu brahmavidyāyāṁ yogaśāstre ramaṇāntevāsino
vāsiṣṭhasya gaṇapaterupanibandhe jīvanmuktivicāro nāma
caturdaśo'dhyāyaḥ

# पञ्चदशोऽध्यायः
# pañcadaśo'dhyāyaḥ

## श्रवण-मनन-निदिध्यासन-निरूपणम्
## śravaṇa-manana-nididhyāsana-nirūpaṇam

श्रवणं नाम किं नाथ मननं नाम किं मतम् ।
किं वा मुनिकुलश्रेष्ठ निदिध्यासनमुच्यते ॥ १५.१ ॥
śravaṇaṁ nāma kiṁ nātha mananaṁ nāma kiṁ matam |
kiṁ vā munikulaśreṣṭha nididhyāsanamucyate || 15.1||

इत्येवं भगवान्पृष्टो मया ब्रह्मविदां वरः ।
द्वाविंशे दिवसे प्रातरब्रवीच्छिष्यसंसदि ॥ १५.२ ॥
ityevaṁ bhagavānpṛṣṭo mayā brahmavidāṁ varaḥ |
dvāviṁśe divase prātarabravīcchiṣyasaṁsadi || 15.2||

वेदशीर्षस्थवाक्यानामर्थव्याख्यानपूर्वकम् ।
आचार्याच्छ्रवणं केचिच्छ्रवणं परिचक्षते ॥ १५.३ ॥
vedaśīrṣasthavākyānāmarthavyākhyānapūrvakam |
ācāryācchravaṇaṁ kecicchravaṇaṁ paricakṣate || 15.3||

अपरे श्रवणं प्राहुराचार्याद्विदितात्मनः ।
गिरां भाषामयीनां च स्वरूपं बोधयन्ति याः ॥ १५.४ ॥
apare śravaṇaṁ prāhurācāryādviditātmanaḥ |
girāṁ bhāṣāmayīnāṁ ca svarūpaṁ bodhayanti yāḥ || 15.4||

श्रुत्वा वेदान्तवाक्यानि निजवाक्यानि वा गुरोः ।
जन्मान्तरीयपुण्येन ज्ञात्वा वोभयमन्तरा ॥ १५.५ ॥
śrutvā vedāntavākyāni nijavākyāni vā guroḥ |
janmāntarīyapuṇyena jñātvā vobhayamantarā || 15.5||
अहंप्रत्ययमूलं त्वं शरीरादेर्विलक्षणः ।
इतीदं श्रवणं चित्ताच्छ्रवणं वस्तुतो भवेत् ॥ १५.६ ॥
ahampratyayamūlaṁ tvaṁ śarīrādervilakṣaṇaḥ |
itīdaṁ śravaṇaṁ cittācchravaṇaṁ vastuto bhavet || 15.6||

वदन्ति मननं केचिच्छास्त्रार्थस्य विचारणम् ।
वस्तुतो मननं तात स्वरूपस्य विचारणम् ॥ १५.७ ॥
vadanti mananaṁ kecicchāstrārthasya vicāraṇam |
vastuto mananaṁ tāta svarūpasya vicāraṇam || 15.7||

विपर्यासेन रहितं संशयेन च मानद ।
कैश्चिद्ब्रह्मात्वमिज्ञानं निदिध्यासनमुच्यते ॥ १५.८ ॥
viparyāsena rahitaṁ saṁśayena ca mānada |
kaiścidbrahmātvamijñānaṁ nididhyāsanamucyate || 15.8||

विपर्यासेन रहितं संशयेन च यद्यपि ।
शास्त्रीयमैक्यविज्ञानं केवलं नानुभूतये ॥ १५.९ ॥
viparyāsena rahitaṁ saṁśayena ca yadyapi |
śāstrīyamaikyavijñānaṁ kevalaṁ nānubhūtaye || 15.9||

संशयश्च विपर्यासो निवार्येते उभावपि ।
अनुभूत्यैव वासिष्ठ न शास्त्रशतकैरपि ॥ १५.१० ॥
saṁśayaśca viparyāso nivāryete ubhāvapi |
anubhūtyaiva vāsiṣṭha na śāstraśatakairapi || 15.10||

शास्त्रं श्रद्धावतो हन्यात्संशयं च विपर्ययम् ।
श्रद्धायाः किञ्चिदूनत्वे पुनरभ्युदयस्तयोः ॥ १५.११ ॥
śāstraṁ śraddhāvato hanyātsaṁśayaṁ ca viparyayam |
śraddhāyāḥ kiñcidūnatve punarabhyudayastayoḥ || 15.11||

मूलच्छेदस्तु वासिष्ठ स्वरूपानुभवे तयोः ।
स्वरूपे संस्थितिस्तस्मान्निदिध्यासनमुच्यते ॥ १५.१२ ॥
mūlacchedastu vāsiṣṭha svarūpānubhave tayoḥ |
svarūpe saṁsthitistasmānnididhyāsanamucyate || 15.12||

बहिस्सञ्चरतस्तात स्वरूपे संस्थितिं विना ।
अपरोक्षो भवेद्बोधो न शास्त्रशतचर्चया ॥ १५.१३ ॥
bahissañcaratastāta svarūpe saṁsthitiṁ vinā |
aparokṣo bhavedbodho na śāstraśatarccayā || 15.13||

स्वरूपसंस्थितिः स्याच्चेत्सहजा कुण्डिनर्षभ ।
सा मुक्तिः सा परा निष्ठा स साक्षात्कार ईरितः ॥ १५.१४ ॥
svarūpasaṁsthitiḥ syāccetsahajā kuṇḍinarṣabha |
sā muktiḥ sā parā niṣṭhā sa sākṣātkāra īritaḥ || 15.14||

इति श्रीरमणगीतासु ब्रह्मविद्यायां योगशास्त्रे रमणान्तेवासिनो वासिष्ठस्य गणपतेरुपनिबन्धे श्रवणमनननिदिध्यासननिरूपणं नाम पञ्चदशोऽध्यायः
iti śrīramaṇagītāsu brahmavidyāyāṁ yogaśāstre ramaṇāntevāsino vāsiṣṭhasya gaṇapaterupanibandhe śravaṇamanananididhyāsananirūpaṇaṁ nāma pañcadaśo'dhyāyaḥ

# षोडशोऽध्यायः
## ṣoḍaśo’dhyāyaḥ

## भक्तिविचारः
## bhaktivicāraḥ

अथ भक्तिं समुद्दिश्य पृष्टः पुरुषसत्तमः ।
अभाषत महाभागो भगवान् रमणो मुनिः ॥ १६.१ ॥
atha bhaktiṁ samuddiśya pṛṣṭaḥ puruṣasattamaḥ |
abhāṣata mahābhāgo bhagavān ramaṇo muniḥ || 16.1||

आत्मा प्रियःसमस्तस्य प्रियं नेतरदात्मनः ।
अच्छिन्ना तैलधारावत्प्रीतिर्भक्तिरुदाहृता ॥ १६.२ ॥
ātmā priyaḥsamastasya priyaṁ netaradātmanaḥ |
acchinnā tailadhārāvatprītirbhaktirudāhṛtā || 16.2||

अभिन्नं स्वात्मतः प्रीत्या विजानातीश्वरं कविः ।
जानन्नप्यपरो भिन्नं लीन आत्मनि तिष्ठति ॥ १६.३ ॥
abhinnaṁ svātmataḥ prītyā vijānātīśvaraṁ kaviḥ |
jānannapyaparo bhinnaṁ līna ātmani tiṣṭhati || 16.3||

वहन्ती तैलधारावद्याप्रीतिः परमेश्वरे।
अनिच्छतोऽपि सा बुद्धिं स्वरूपं नयति ध्रुवम्॥ १६.४॥
vahantī tailadhārāvadyāprītiḥ parameśvare |
anicchato'pi sā buddhiṁ svarūpaṁ nayati dhruvam || 16.4||

परिच्छिन्नं यदात्मानं स्वल्पज्ञं चापि मन्यते।
भक्तो विषयिरूपेण तदा क्लेशनिवृत्तये॥ १६.५॥
paricchinnaṁ yadātmānaṁ svalpajñaṁ cāpi manyate |
bhakto viṣayirūpeṇa tadā kleśanivṛttaye || 16.5||
व्यापकं परमं वस्तु भजते देवताधिया।
भजंश्च देवताबुद्ध्या तदेवान्ते समश्नुते॥ १६.६॥
vyāpakaṁ paramaṁ vastu bhajate devatādhiyā |
bhajaṁśca devatābuddhyā tadevānte samaśnute || 16.6||

देवताया नरश्रेष्ठ नामरूपप्रकल्पनात्।
ताभ्यां तु नामरूपाभ्यां नामरूपे विजेष्यति॥ १६.७॥
devatāyā naraśreṣṭha nāmarūpaprakalpanāt |
tābhyāṁ tu nāmarūpābhyāṁ nāmarūpe vijeṣyati || 16.7||

भक्तौ तु परिपूर्णायामलं श्रवणमेकदा।
ज्ञानाय परिपूर्णाय तदा भक्तिः प्रकल्पते॥ १६.८॥
bhaktau tu paripūrṇāyāmalaṁ śravaṇamekadā |
jñānāya paripūrṇāya tadā bhaktiḥ prakalpate || 16.8||

धाराव्यपेता या भक्तिः सा विच्छिन्नेति कीर्त्यते।
भक्तेः परस्याः सा हेतुर्भवतीति विनिर्णयः॥ १६.९॥
dhārāvyapetā yā bhaktiḥ sā vicchinneti kīrtyate |
bhakteḥ parasyāḥ sā heturbhavatīti vinirṇayaḥ || 16.9||

कामाय भक्तिं कुर्वाणः कामं प्राप्याप्यनिर्वृतः ।
शाश्वताय सुखायान्ते भजते पुनरीश्वरम् ॥ १६.१० ॥
kāmāya bhaktiṁ kurvāṇaḥ kāmaṁ prāpyāpyanirvṛtaḥ |
śāśvatāya sukhāyānte bhajate punarīśvaram || 16.10||

भक्तिः कामसमेताऽपि कामाप्तौ न निवर्तते ।
श्रद्धा वृद्धा परे पुंसि भूय एवाभिवर्धते ॥ १६.११ ॥
bhaktiḥ kāmasametā'pi kāmāptau na nivartate |
śraddhā vṛddhā pare puṁsi bhūya evābhivardhate || 16.11||

वर्धमाना च सा भक्तिः काले पूर्णा भविष्यति ।
पूर्णयापरया भक्त्या ज्ञानेनेव भवं तरेत् ॥ १६.१२ ॥
vardhamānā ca sā bhaktiḥ kāle pūrṇā bhaviṣyati |
pūrṇayāparayā bhaktyā jñāneneva bhavaṁ taret || 16.12||

इति श्रीरमणगीतासु ब्रह्मविद्यायां योगशास्त्रे रमणान्तेवासिनो
वासिष्ठस्य गणपतेरुपनिबन्धे भक्तिविचारो नाम षोडशोऽध्यायः
iti śrīramaṇagītāsu brahmavidyāyāṁ yogaśāstre ramaṇāntevāsino
vāsiṣṭhasya gaṇapaterupanibandhe bhaktivicāro nāma
ṣoḍaśo'dhyāyaḥ

# सप्तदशोऽध्यायः
## saptadaśo'dhyāyaḥ

# ज्ञानप्राप्तिविचारः
## jñānaprāptivicāraḥ

पञ्चविंशे तु दिवसे वैदर्भो विदुषां वरः।
प्रश्रयावनतो भूत्वा मुनिं भूयोऽपि पृष्टवान्॥ १७.१॥
pañcaviṁśe tu divase vaidarbho viduṣāṁ varaḥ |
praśrayāvanato bhūtvā muniṁ bhūyo'pi pṛṣṭavān || 17.1||

**वैदर्भ उवाच**
क्रमेणायाति किं ज्ञानं किञ्चित्किञ्चिद्दिने दिने।
एकस्मिन्नेव काले किं पूर्णमाभाति भानुवत्॥ १७.२॥
**vaidarbha uvāca**
krameṇāyāti kiṁ jñānaṁ kiñcitkiñciddine dine |
ekasminneva kāle kiṁ pūrṇamābhāti bhānuvat || 17.2||

**भगवानुवाच**
क्रमेणायाति न ज्ञानं किञ्चित्किञ्चिद्दिने दिने।
अभ्यासपरिपाकेन भासते पूर्णमेकदा॥ १७.३॥
**bhagavānuvāca**
krameṇāyāti na jñānaṁ kiñcitkiñciddine dine |
abhyāsaparipākena bhāsate pūrṇamekadā || 17.3||

## वैदर्भ उवाच

अभ्यासकाले भगवन् वृत्तिरन्तर्बहिस्तथा ।
यातायातं प्रकुर्वाणा याते किं ज्ञानमुच्यते ॥ १७.४ ॥

**vaidarbha uvāca**
abhyāsakāle bhagavan vṛttirantarbahistathā |
yātāyātaṁ prakurvāṇā yāte kiṁ jñānamucyate || 17.4||

## भगवानुवाच

अन्तर्याता मतिर्विद्वन्बहिरायाति चेत्पुनः ।
अभ्यासमेव तामाहुर्ज्ञानं ह्यनुभवोऽच्युतः ॥ १७.५ ॥

**bhagavānuvāca**
antaryātā matirvidvanbahirāyāti cetpunaḥ |
abhyāsameva tāmāhurjñānaṁ hyanubhavo'cyutaḥ || 17.5||

## वैदर्भ उवाच

ज्ञानस्य मुनिसार्दूल भूमिकाः काश्चिदीरिताः ।
शास्त्रेषु विदुषां श्रेष्ठैः कथं तासां समन्वयः ॥ १७.६ ॥

**vaidarbha uvāca**
jñānasya munisārdūla bhūmikāḥ kāścidīritāḥ |
śāstreṣu viduṣāṁ śreṣṭhaiḥ kathaṁ tāsāṁ samanvayaḥ || 17.6||

## भगवानुवाच

शास्त्रोक्ता भूमिकास्सर्वा भवन्ति परबुद्धिगाः ।
मुक्तिभेदा इव प्राज्ञ ज्ञानमेकं प्रजानताम् ॥ १७.७ ॥

**bhagavānuvāca**
śāstroktā bhūmikāssarvā bhavanti parabuddhigāḥ |
muktibhedā iva prājña jñānamekaṁ prajānatām || 17.7||

चर्यां देहेन्द्रियादीनां वीक्ष्यारब्धानुसारिणीम् ।
कल्पयन्ति परे भूमीस्तारतम्यं न वस्तुतः ॥ १७.८ ॥
caryāṁ dehendriyādīnāṁ vīkṣyārabdhānusāriṇīm |
kalpayanti pare bhūmīstāratamyaṁ na vastutaḥ || 17.8||

**वैदर्भ उवाच**
प्रज्ञानमेकदा सिद्धं सर्वाज्ञाननिबर्हणम् ।
तिरोधत्ते किमज्ञानात्सङ्गादङ्कुरितात्पुनः ॥ १७.९ ॥
**vaidarbha uvāca**
prajñānamekadā siddhaṁ sarvājñānanibarhaṇam |
tirodhatte kimajñānātsaṅgādaṅkuritātpunaḥ || 17.9||

**भगवानुवाच**
अज्ञानस्य प्रतिद्वन्द्वि न पराभूयते पुनः ।
प्रज्ञानमेकदा सिद्धं भरद्वाजकुलोद्वह । १७.१० ॥
**bhagavānuvāca**
ajñānasya pratidvandvi na parābhūyate punaḥ |
prajñānamekadā siddhaṁ bharadvājakulodvaha || 17.10||

इति श्रीरमणगीतासु ब्रह्मविद्यायां योगशास्त्रे रमणान्तेवासिनो
वासिष्ठस्य गणपतेरुपनिबन्धे ज्ञानप्राप्तिविचारो नाम सप्तदशोऽध्यायः
iti śrīramaṇagītāsu brahmavidyāyāṁ yogaśāstre ramaṇāntevāsino
vāsiṣṭhasya gaṇapaterupanibandhe jñānaprāptivicāro nāma
saptadaśo'dhyāyaḥ

# अष्टादशोऽध्यायः
## aṣṭādaśo'dhyāyaḥ

# सिद्धमहिमानुकीर्तनम्
## siddhamahimānukīrtanam

वरपराशरगोत्रसमुद्भवं
वसुमतीसुरसङ्घयशस्करम्।
विमलसुन्दरपण्डितनन्दनं
कमलपत्रविशालविलोचनम्॥ १८.१॥

varaparāśaragotrasamudbhavaṁ
vasumatīsurasaṅghayaśaskaram ।
vimalasundarapaṇḍitanandanaṁ
kamalapatraviśālavilocanam ।। 18.1।।

अरुणशैलगताश्रमवासिनं
परमहंसमनञ्जनमच्युतम्।
करुणया दधतं व्यवहारितां
सततमात्मनि संस्थितमक्षरे॥ १८.२॥

aruṇaśailagatāśramavāsinaṁ
paramahaṁsamanañjanamacyutam ।
karuṇayā dadhataṁ vyavahāritāṁ
satatamātmani saṁsthitamakṣare ।। 18.2।।

अखिलसंशयवारणभाषणं
भ्रममदद्विरदाङ्कुशवीक्षणम् ।
अविरतं परसौख्यधृतोद्यमं
निजतनूविषयेष्वलसालसम् ॥ १८.३ ॥

akhilasaṁśayavāraṇabhāṣaṇaṁ
bhramamadadviradāṅkuśavīkṣaṇam |
aviratam parasaukhyadhṛtodyamaṁ
nijatanūviṣayeṣvalasālasam || 18.3||

परिणताम्रफलप्रभविग्रहं
चलतरेन्द्रियनिग्रहसग्रहम् ।
अमृतचिद्घनवल्लिपरिग्रहं
मितवचोरचितागमसङ्ग्रहम् ॥ १८.४ ॥

pariṇatāmraphalaprabhavigrahaṁ
calatarendriyanigrahasagraham |
amṛtacidghanavalliparigrahaṁ
mitavacoracitāgamasaṅgraham || 18.4||

अमलदीप्ततरात्ममरीचिभि
र्निजकरैरिव पङ्कजबान्धवम् ।
पदजुषां जडभावमनेहसा
परिहरन्तमनन्तगुणाकरम् ॥ १८.५ ॥

amaladīptatarātmamarīcibhi
rnijakarairiva paṅkajabāndhavam |
padajuṣāṁ jaḍabhāvamanehasā
pariharantamanantaguṇākaram || 18.5||

मृदुतमं वचने दृशि शीतलं
विकसितं वदने सरसीरुहे ।
मनसि शून्यमहश्शशिसन्निभे
हृदि लसन्तमनन्त इवारुणम् ॥ १८.६ ॥

mṛdutamaṁ vacane dṛśi śītalaṁ
vikasitaṁ vadane sarasīruhe |
manasi śūnyamahaśśaśisannibhe
hṛdi lasantamananta ivāruṇam || 18.6||

अदयमात्मतनौ कठिनं व्रते
परुषचित्तमलं विषयव्रजे ।
ऋषिमरोषमपेतमनोरथं
धृतमदं घनचिल्लहरीवशात् ॥ १८.७ ॥

adayamātmatanau kaṭhinaṁ vrate
paruṣacittamalaṁ viṣayavraje |
ṛṣimaroṣamapetamanorathaṁ
dhṛtamadaṁ ghanacillaharīvaśāt || 18.7||

विगतमोहमलोभमभावनं
शमितमत्सरमुत्सविनं सदा ।
भवमहोदधितारणकर्मणि
प्रतिफलेन विनैव सदोद्यतम् ॥ १८.८ ॥

vigatamohamalobhamabhāvanaṁ
śamitamatsaramutsavinaṁ sadā |
bhavamahodadhitāraṇakarmaṇi
pratiphalena vinaiva sadodyatam || 18.8||

माता ममेति नगराजसुतोरुपीठं
नागानने भजति याहि पिता ममेति ।
अङ्कं हरस्य समवाप्य शिरस्यनेन
संचुम्बितस्य गिरिरन्ध्रकृतो विभूतिम् ॥ १८.९ ॥

mātā mameti nagarājasutorupīṭhaṁ
nāgānane bhajati yāhi pitā mameti |
aṅkaṁ harasya samavāpya śirasyanena
sañcumbitasya girirandhrakṛto vibhūtim || 18.9||

*वेदादिपाकदमनोत्तरकच्छपेशै-
र्युक्तैर्धराधरसुषुप्त्यमरेश्वरैश्च ।
सूक्ष्मामृतायुगमृतेन सहप्रणत्या
सम्पन्नशब्दपटलस्य रहस्यमर्थम् ॥ १८.१० ॥

vedādipākadamanottarakacchapeśai-
ryuktairdharādharasuṣuptyamareśvaraiśca |
sūkṣmāmṛtāyugamṛtena sahapraṇatyā
sampannaśabdapaṭalasya rahasyamartham || 18.10||

दण्डं विनैव यतिनं बत दण्डपाणिं
दुःखाब्धितारकमरिं बत तारकस्य ।
त्यक्त्वा भवं भवमहो सततं भजन्तं
हंसं तथापि गतमानससङ्गरागम् ॥ १८.११ ॥

daṇḍaṁ vinaiva yatinaṁ bata daṇḍapāṇiṁ
duḥkhābdhitārakamariṁ bata tārakasya |
tyaktvā bhavaṁ bhavamaho satataṁ bhajantaṁ
haṁsaṁ tathāpi gatamānasasaṅgarāgam || 18.11||

---

* अनुबन्धः १ (anubandhaḥ 1)

धीरत्वसम्पदि सुवर्णगिरेरनूनं
 वारांनिधेरधिकमेव गभीरतायाम् ।
क्षान्तौ जयन्तमचलामखिलस्य धात्रीं
 दान्तौ निदर्शनमशान्तिकथादविष्ठम् ॥ १८.१२ ॥

dhīratvasampadi suvarṇagireranūnaṁ
 vārānnidheradhikameva gabhīratāyām |
kṣāntau jayantamacalāmakhilasya dhātrīṁ
 dāntau nidarśanamaśāntikathādaviṣṭham || 18.12||

नीलारविन्दसुहृदा सदृशं प्रसादे
 तुल्यं तथा महसि तोयजबान्धवेन ।
ब्राह्म्यां स्थितौ तु पितरं वटमूलवासं
 संस्मारयन्तमचलन्तमनूदितं मे ॥ १८.१३ ॥

nīlāravindasuhṛdā sadṛśaṁ prasāde
 tulyaṁ tathā mahasi toyajabāndhavena |
brāhmyāṁ sthitau tu pitaraṁ vaṭamūlavāsaṁ
 saṁsmārayantamacalantamanūditaṁ me || 18.13||

यस्याधुनापि रमणी रमणीयभावा
 गीर्वाणलोकपृतना शुभवृत्तिरूपा ।
संशोभते शिरसि नापि मनोजगन्ध-
 स्तत्तादृशं गृहिणमप्यधिपं यतीनाम् ॥ १८.१४ ॥

yasyādhunāpi ramaṇī ramaṇīyabhāvā
 gīrvāṇalokapṛtanā śubhavṛttirūpā |
saṁśobhate śirasi nāpi manojagandha-
 stattādṛśaṁ gṛhiṇamapyadhipaṁ yatīnām || 18.14||

वन्दारुलोकवरदं नरदन्तिनोऽपि
मन्त्रेश्वरस्य महतो गुरुतां वहन्तम् ।
मन्दारवृक्षमिव सर्वजनस्य पाद-
च्छायां श्रितस्य परितापमपाहरन्तम् ॥ १८.१५ ॥

vandārulokavaradaṁ naradantino'pi
mantreśvarasya mahato gurutāṁ vahantam |
mandāravṛkṣamiva sarvajanasya pāda-
cchāyāṁ śritasya paritāpamapāharantam || 18.15||

यस्तन्त्रवार्तिकमनेकविचित्रयुक्ति-
संशोभितं निगमजीवनमाततान ।
भट्टस्य तस्य बुधसंहतिसंस्तुतस्य
वेषान्तरं तु निगमान्तवचो विचारि ॥ १८.१६ ॥

yastantravārtikamanekavicitrayukti-
saṁśobhitaṁ nigamajīvanamātatāna |
bhaṭṭasya tasya budhasaṁhatisaṁstutasya
veṣāntaraṁ tu nigamāntavaco vicāri || 18.16||

*वेदशीर्षचयसारसङ्ग्रहं
पञ्चरत्नमरुणाचलस्य यः ।
गुप्तमल्पमपि सर्वतोमुखं
सूत्रभूतमतनोदिमं गुरुम् ॥ १८.१७ ॥

vedaśīrṣacayasārasaṅgrahaṁ
pañcaratnamaruṇācalasya yaḥ |
guptamalpamapi sarvatomukhaṁ
sūtrabhūtamatanodimaṁ gurum || 18.17||

---

* अनुबन्धः २ (anubandhaḥ 2)

देववाचि सुतरामशिक्षितं
 काव्यगन्धरहितं च यद्यपि ।
ग्रन्थकर्मणि तथाऽपि संस्फुर-
 द्भाषितानुचरभावसञ्चयम् ॥ १८.१८ ॥

devavāci sutarāmaśikṣitaṁ
 kāvyagandharahitaṁ ca yadyapi |
granthakarmaṇi tathāa'pi saṁsphura-
 dbhāṣitānucarabhāvasañcayam || 18.18||

लोकमातृकुचदुग्धपायिन-
 श्शङ्करस्तवकृतो महाकवेः ।
द्राविडद्विजशिशोर्नटद्गिरो
 भूमिकान्तरमपारमेधसम् ॥ १८.१९ ॥

lokamātṛkucadugdhapāyina-
 śśaṅkarastavakṛto mahākaveḥ |
drāviḍadvijaśiśornaṭadgiro
 bhūmikāntaramapāramedhasam || 18.19||

भूतले त्विह तृतीयमुद्भवं
 क्रौञ्चभूमिधररन्ध्रकारिणः ।
ब्रह्मनिष्ठितदशाप्रदर्शना-
 द्युक्तिवादतिमिरस्य शान्तये ॥ १८.२० ॥

bhūtale tviha tṛtīyamudbhavaṁ
 krauñcabhūmidhararandhrakāriṇaḥ |
brahmaniṣṭhitadaśāpradarśanā-
 dyuktivādatimirasya śāntaye || 18.20||

कुम्भयोनिमुखमौनिपूजिते
   द्राविडे वचसि विश्रुतं कविम्।
दृष्टवन्तमजरं परं महः
   केवलं धिषणाया गुरुं विना॥ १८.२१॥

kumbhayonimukhamaunipūjite
   drāviḍe vacasi viśrutaṁ kavim |
dṛṣṭavantamajaraṁ paraṁ mahaḥ
   kevalaṁ dhiṣaṇāyā guruṁ vinā || 18.21||

बालकेऽपि जडगोपकेऽपि वा
   वानरेऽपि शुनि वा खलेऽपि वा।
पण्डितेऽपि पदसंश्रितेऽपि वा
   पक्षपातरहितं समेक्षणम्॥ १८.२२॥

bālake'pi jaḍagopake'pi vā
   vānare'pi śuni vā khale'pi vā |
paṇḍite'pi padasaṁśrite'pi vā
   pakṣapātarahitaṁ samekṣaṇam || 18.22||

शक्तिमन्तमपि शान्तिसंयुतं
   भक्तिमन्तमपि भेदवर्जितम्।
वीतरागमपि लोकवत्सलं
   देवतांशमपि नम्रचेष्टितम्॥ १८.२३॥

śaktimantamapi śāntisaṁyutaṁ
   bhaktimantamapi bhedavarjitam |
vītarāgamapi lokavatsalaṁ
   devatāṁśamapi namraceṣṭitam || 18.23||

एष यामि पितुरन्तिकं ममा-
न्वेषणं तु न विधीयतामिति ।
संविलिख्य गृहतो विनिर्गतं
शोणशैलचरणं समागतम् ॥ १८.२४ ॥

eṣa yāmi piturantikaṁ mamā-
nveṣaṇaṁ tu na vidhīyatāmiti |
saṁvilikhya gṛhato vinirgataṁ
śoṇaśailacaraṇaṁ samāgatam || 18.24||

ईदृशं गुणगणैरभिरामं
प्रश्रयेण रमणं भगवन्तम् ।
सिद्धलोकमहिमानमपारं
पृष्टवानमृतनाथयतीन्द्रः ॥ १८.२५ ॥

īdṛśaṁ guṇagaṇairabhirāmaṁ
praśrayeṇa ramaṇaṁ bhagavantam |
siddhalokamahimānamapāraṁ
pṛṣṭavānamṛtanāthayatīndraḥ || 18.25||

आह तं स भगवानगवासी
सिद्धलोकमहिमा तु दुरूहः ।
ते शिवेन सदृशाः शिवरूपाः
शक्नुवान्ति च वाराण्यपि दातुम् ॥ १८.२६ ॥

āha taṁ sa bhagavānagavāsī
siddhalokamahimā tu durūhaḥ |
te śivena sadṛśāḥ śivarūpāḥ
śaknuvānti ca vārāṇyapi dātum || 18.26||

इति श्रीरमणगीतासु ब्रह्मविद्यायां योगशास्त्रे रमणान्तेवासिनो वासिष्ठस्य गणपतेरुपनिबन्धे सिद्धमहिमानुकीर्तनं नाम अष्टादशोऽध्यायः

iti śrīramaṇagītāsu brahmavidyāyāṁ yogaśāstre ramaṇāntevāsino vāsiṣṭhasya gaṇapaterupanibandhe siddhamahimānukīrtanaṁ nāma aṣṭādaśo’dhyāyaḥ

# अनुबन्धः १
## anubandhaḥ 1

# मन्त्रोद्धारः
## mantroddhāraḥ

वेदादिपाकदमनोत्तरकच्छपेशै-
र्युक्तैर्धराधरसुषुप्त्यमरेश्वरैश्च ।
सूक्ष्मामृतायुगमृतेन सह प्रणत्या
सम्पन्नशब्दपटलस्य रहस्यमर्थम् ॥
अ.१८, श्लो. १०

vedādipākadamanottarakacchapeśair-
yuktairdharādharasuṣuptyamareśvaraiśca |
sūkṣmāmṛtāyugamṛtena saha praṇatyā
sampannaśabdapaṭalasya rahasyamartham ||
a.18, ślo. 10

वेदादिः प्रणवः पाकदमनादिन्द्रबीजाल्लकारादुत्तरो वकारः पाकदमनोत्तर उच्यते। कच्छपेशः कूर्मेशनामकरुद्रस्य बीजं चकारः। तैः ओं वच इत्येतैरक्षरैः। धराधरः पर्वतबीजं दकारः। सुषुप्तिर्निद्रानामकशक्तेर्बीजं भकारः। अमरेश्वरः अमरेश्वरनामकरुद्रस्य बीजं उकारः। तैर्युक्तैः द्भु इत्येतेनाक्षरेणेति यावत्। सूक्ष्मामृता

सूक्ष्मामृतानामकशक्तेर्बीजं एकारः। तद्युक् तद्युक्तं अमृतं तोयबीजं तेन वे इत्यक्षरेण। प्रणत्या नमः इति पल्लवेन च सह मिलित्वा सम्पन्नशब्दपटलस्य ओं वचद्भुवे नमः इति मन्त्रस्य। रहस्यं तत्त्ववेत्तृभिरेव ज्ञातुं शक्यं अर्थं वाच्यभूतं। रमणं भगवन्तं अमृतनाथयतीन्द्रः पृष्टवानित्युत्तरेणान्वयः। एवं च भगवतो गुरोर्मन्त्रः ओं वचद्भुवे नमः इति पर्यवस्यति।

- गुरुमन्त्रभाष्यम्

vedādiḥ praṇavaḥ pākadamanādindrabījāllakārāduttaro vakāraḥ pākadamanottara ucyate | kacchapeśaḥ kūrmeśanāmakarudrasya bījaṁ cakāraḥ | taiḥ oṁ vaca ityetairakṣaraiḥ | dharādharaḥ parvatabījaṁ dakāraḥ | suṣuptirnidrānāmakaśakterbījaṁ bhakāraḥ | amareśvaraḥ amareśvaranāmakarudrasya bījam ukāraḥ | tairyuktaiḥ dbhu ityetenākṣareṇeti yāvat | sūkṣmāmṛtā sūkṣmāmṛtānāmakaśakterbījam ekāraḥ | tadyuk tadyuktam amṛtaṁ toyabījaṁ tena ve ityakṣareṇa | praṇatyā namaḥ iti pallavena ca saha militvā sampannaśabdapaṭalasya oṁ vacadbhuve namaḥ iti mantrasya | rahasyaṁ tattvavettṛbhireva jñātuṁ śakyam arthaṁ vācyabhūtaṁ | ramaṇaṁ bhagavantam amṛtanāthayatīndraḥ pṛṣṭavānityuttareṇānvayaḥ | evaṁ ca bhagavato gurormantraḥ oṁ vacadbhuve namaḥ iti paryavasyati |

- gurumantrabhāṣyam

# अनुबन्धः २
## anubandhaḥ 2

## श्री अरुणाचल पञ्चरत्नम्
## śrī aruṇācala pañcaratnam

करुणा पूर्ण सुधाब्धे
   कबलित घनविश्वरूप किरणाऽवल्या ॥
अरुणाचल परमात्मन्
   अरुणो भवचित्त कंजसुविकासाय ॥

karuṇā pūrṇa sudhābdhe
   kabalita ghanaviśvarūpa kiraṇā'valyā ||
aruṇācala paramātman
   aruṇo bhavacitta kañjasuvikāsāya ||

त्वय्यरुणाचल सर्वम्
   भूत्वास्थित्वा प्रलीनं एतत् चित्रम् ॥
हृद्यहमित्यात्मतया
   नृत्यसि भोस्ते वदन्ति हृदयं नाम ॥

tvayyaruṇācala sarvam
   bhūtvāsthitvā pralīnam etat citram ||
hṛdyahamityātmatayā
   nṛtyasi bhoste vadanti hṛdayaṁ nāma ||

अहमिति कुत आयाति
    अन्विष्यान्तः प्रविष्टयाऽत्यमलधिया ॥
अवगम्यस्वं रूपम्
    शाम्यत्यरुणाचल त्वयि नदीवाब्धौ ॥

ahamiti kuta āyāti
    anviṣyāntaḥ praviṣṭayā'tyamaladhiyā ||
avagamyasvaṁ rūpam
    śāmyatyaruṇācala tvayi nadīvābdhau ||

त्यक्तवा विषयं बाह्यम्
    रुद्ध प्राणेन रुद्ध मनसाऽन्त स्त्वाम् ॥
ध्यायन्पश्यति योगी
    दीधितिम् अरुणाचलत्वयि महीयंते ॥

tyaktavā viṣayaṁ bāhyam
    ruddha prāṇena ruddha manasā'nta stvām ||
dhyāyanpaśyati yogī
    dīdhitim aruṇācalatvayi mahīyante ||

त्वय्यर्पितमनसात्वाम्
    पश्यन्सर्वं तवाकृति तया सततम् ॥
भजतेऽनन्य प्रीत्या
    सजयत्यरुणाचल त्वयि सुखे मग्नः ॥

tvayyarpitamanasātvām
    paśyansarvaṁ tavākṛti tayā satatam ||
bhajate'nanya prītyā
    sajayatyaruṇācala tvayi sukhe magnaḥ ||

इति श्रीपाराशर्यस्य भगवतो ब्रह्मर्षेराचार्य
रमणस्य दर्शनं अरुणाचलपञ्चरत्नम्

iti śrīpārāśaryasya bhagavato brahmarṣerācārya
ramaṇasya darśanaṁ aruṇācalapañcaratnam

श्रीमद्रमण महर्षेर्दर्शनं
 अरुणाचलस्य देवगिरा ।
पञ्चकमार्यागीतौ रत्नं
 त्विदमौपनिषदं हि ॥

śrīmadramaṇa maharṣerdarśanaṁ
 aruṇācalasya devagirā |
pañcakamāryāgītau ratnaṁ
 tvidamaupaniṣadaṁ hi ||